श्री स्वामिनारायणो विजयतेतराम् ॥

chapter- 6

# श्री स्वामिनारायणदर्शनाभिमततत्त्वविवेचनम्

## षष्ठोऽध्यायः

( परब्रह्मनिरूपणात्मकः )

# श्रीस्वामिनारायणदर्शनाभिमततत्त्वविवेचनम्

## षष्ठोऽध्यायः

## ६.१ "परब्रह्मनिरूपणम्"

स्वामिनारायणदर्शने स्वीकृततत्त्वेषु परस्य ब्रह्मणः स्थानं पञ्चमं विद्यते, पञ्चतत्त्वानां निम्नक्रमेण परिगणने कृते सति । अन्यथा पप्रथमं तत्त्वं परंब्रह्म । तदिदं परब्रह्म तत्त्वमेव समेषु तत्त्वेषूत्कृष्टतमम् । इदं परब्रह्मैव स्वेतराणां सर्वेषां तत्त्वानां शेषी, स्वामी, नियामकश्च कथ्यते । इदमेव तत्त्वं परमात्मेति भगवानित्यादिभिर्शब्दैर्व्यपदिश्यते । सोऽयं परमात्मैव सर्वेषां कर्माणां फलप्रदाता सर्वेषां कार्याणामुत्पादकः, सर्वजगच्छरीरकः, सर्वव्यापकः, सर्वज्ञः, सत्यसंकल्पः, स्वेतरेभ्यो समस्तेभ्यो वस्तुभ्यो बृहत्, तेषां बृंहणकर्ता च विद्यते। अयमेव भगवान् मुक्तानां परमा गतिः पुरुषोत्तमः, जगतोऽस्य सकलस्य सृष्टिस्थितिलयानां कारणः, अखिलहेयप्रत्यनीकः, निरवधिकातिशया संख्येयकल्याणगुणसागरः निरवधिकनियामकश्च चेतनो वर्तते । अस्य परस्य ब्रह्मणः स्वरूपनिरूपणावसरे पण्डितवरेण्यः श्रीकृष्णवल्लभाचार्यः स्वकीये श्री स्वामिनारायणवेदान्तसारनामके ग्रन्थे प्राह –

**'सर्वेश्वरत्वम्, सर्वशेषित्वम्, सर्वकर्माराध्यत्त्वम्, सर्वकर्म फलप्रदत्वम्, सर्वाधारत्वम्, सर्वकार्योत्पादकत्वम्, स्वस्वज्ञानेतरसमस्त द्रव्यशरीरकत्वम्, सर्वव्यापकचेतनत्वम्, स्वतः सत्यसंकल्पत्वम्, स्वरूपतो गुणतश्च यस्मिन्ननवधिकबृहत्त्वं, मुक्तप्राप्यपुरुषत्वम्, जगज्जन्म-स्थितिलयहेतुत्वम्, स्वतो निरस्तनिखिलदोषत्वम्, स्वतः कल्याणगुणा करत्वम्, स्वतो ज्ञानाद्यनन्तकल्याणगुणयोगहेयप्रत्यनीकत्वं च, निरवधिक-नियामकं चेतनमित्यादीनि लक्षणानि ज्ञेयानि [१]'।**

आध्यात्मिकतत्त्वाख्याने परंब्रह्मणः लक्षणमनेन प्रकारेण कृतं वर्तते

**मायाजीवेश्वरब्रह्मनियन्तृत्वं सदैव तु ।**
**समस्तजगतामेकहेतुता सर्वशक्तिता ।।**
**सर्वान्तरात्मता सर्वस्वामित्वं ध्येयता सदा ।**
**ब्रह्मात्मभिः सेव्यता च लक्षणं परमात्मनः ।।**
**जगज्जन्मादिहेतुत्त्वं लक्ष्म तस्य प्रकीर्तितम् [२]।**

---

१- श्री स्वामिनारायणवेदान्तसारः सप्तमं प्रकरणम् पृ. २६

२-आध्यात्मिकतत्त्वाख्यानम् अध्याय -२०/७९-८१

यस्मात्कारणात् स्वरूपतो गुणतश्च यस्मिन् निःसीमबृहत्त्वं वर्तते तस्मादेव कारणात् परंब्रह्मेति कथ्यते। अखिलकल्याणगुणकरत्वात् अखिलहेय प्रत्यनीकत्वाच्चायं भगवान् भगवान् शब्देन व्यपदिश्यते।

**"न तत्समश्चाभ्यधिकश्च दृश्यते**[१]"

अथाह पुरुषो वै नारायणः"

इति प्रमुखश्रुतिनिकरे निरूपितं परब्रह्मतत्त्वन्तु समेषां दार्शनिकानां मते परमोत्कृष्टतत्त्वं वर्तते। तत्त्वस्यास्य विविधसंज्ञयाऽवबोध इति श्रीकृष्ण - वल्लभाचार्येण तत्त्वप्रभावली नामके ग्रन्थे लिखितं तद्यथा-

"अथ परब्रह्मेति, परमात्मा वा, परमेश्वरो वा, पुरुषोत्तमो वा, भगवान् वा, सर्वज्ञात्मेशो वा, नित्यप्रत्यक्षदर्शी वा, सर्वकालीनज्ञो वा,परमपुरुषो वा, पुरुषविशेषो वा, नित्यानन्दधनो वा, सर्वैश्वर्यसम्पन्नमहेश्वरो वा, सर्वशरीरिविनियोक्ता वा, नित्यविज्ञानं वा, सर्वव्यापकात्मेशो वा, सर्वात्मा वा, सर्वै वा, सर्वाविर्भावभूमिर्वा, परविद्यानिधिर्वा, अंशकलाऽऽवेशविभूतिपूर्णपरिपूर्णस्वरूपान्तर्यामि व्यूहाऽर्चापरान्यतमतत्त्वं वेति। शुद्धबुद्धस्वभाव इत्यौपनिषदः, आदिविद्वान् सिद्ध इति कापिलाः क्लेशकर्मविपाकाशयैरपरामृष्टो निर्माणकायमधिष्ठाय सम्प्रदायप्रद्योतकोऽनुग्राहकश्चेति पातञ्जलाः, लोकवेदविरूद्धैरपि निर्लेपः, स्वतन्त्रश्चेति महापाशुपताः, शिव इति शैवाः, पुरुषोत्तम इति वैष्णवाः, पितामह इति पौराणिकाः, यज्ञपुरुष इति याज्ञिकाः, सर्वज्ञ इति सौगताः, निरावरण इति दिगम्बराः, लोकव्यवहारसिद्ध इति चार्वाकाः, यावदुक्तोपपन्न इति नैयायिकाः, विश्वकर्मेति कारवः, नारायणेति सृष्टिस्थाः, दैत्यहा इति नारसिंहाः, त्रियुग इति स्मार्ताः, मोहिनीस्वरूप इति सुधार्थिनः, आकाशवागिति तापसाः, हिरण्मयपुरुष इति हैरण्यगर्भाः, तत्सवितृभर्ग इति गायत्राः, शरण्य इति शरणार्थिनः, सेवाप्रसन्न इति सेवकाः, गणेश इति गाणपत्याः, सूर्य इति सौराः, धन्वन्तरिरिति भिषग्वराः, अवतार इति शरीरिणः, अवतारीति सर्वोपरयः, पारद इति रसेश्वराः, विराडिति स्थूलाः, अशनिरिति वज्रिणः, नटवर इति नराः, स्मर इति प्रमदाः, गोपाल इति गोपिकाः, शासक इति क्षितीशाः, मृत्युरिति द्वेषिणः,परतत्त्वमिति योगिनः, ब्रह्मचर्यमिति शीलव्रतिनः, परदैवतमिति भाग्याबलम्बिनः, विभूतिरिति सारग्राहिणः, तेजोमात्रमिति निराकाराः, यमराज इति याम्याः, विष्णुरिति देवाः, महाविष्णुरिति महावैष्णवाः, गुरुरिति ज्ञानिनः, वेदवक्तेति वैदिकाः, अदृष्टमिति कर्मिणः, भूमेति

---

१-श्वेताश्वतरोपनिषत् ६/८

सौत्राः, वासुदेवेति पौराणिकाः, प्रत्यक्षसाधुरिति विश्वासिनः, पतिरिति पतिव्रताः, अग्निरिति पारशवाः, अल्लेति म्लेच्छाः, ईशान इति गौरसुखाः, बुद्ध इति बौद्धाः, कर्तेति तार्किकाः, प्रमाणसिद्ध इति प्रामाणिकाः, सर्वोत्तमतत्त्वमिति शास्त्रिणः, आचार्य इति शिष्याः, दण्डधर इति क्षतिमन्तः, व्यष्टिसमष्ट्यात्मक इति व्यासाः, महाकाल इति आभिनिवेशिकाः, लक्ष्मीश इति नाणकिनः, स्वेष्टपूरकेति व्रतिनः, सर्वप्रद इति नियमिनः, किं विस्तरेण, यं वृन्दला अपि बहुचरेत्युपासते दैवज्ञाश्च दैवं भाग्यं प्रारब्धं चेत्यप्युपासते"।

तमेनं तत्तदुपासनानुसारेणोपासकास्तत्तद्रूपेण समर्जयन्ति यत्र यत्र भूमिकायां सा सा भूमिका तत्तदीयमुक्तिभूमिरिति।

**'एकमेवाऽद्वितीयं परब्रह्मैव तत्तद्विशिष्टावस्थापन्नं तत्तदाश्रितोपास्तिभूमिरूपं सत् तत्तदाकारेण तत्तदुपासकेन तत्र तत्रोपलभ्यते चेति तत्परिचायकतया पुराणे सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तदृष्टिः। अनन्तशक्तिश्च विभोर्विभुज्ञाः षडाहुरंगानि महेश्वरस्य। यो वेत्ति युगपत् सर्वं प्रत्यक्षेण सदा स्वतः। उत्पत्तिं च विनाशं च जनानां गतिमागतिम्। वेत्ति विद्यामविद्यां च स ज्ञेयो भगवानिति** [1] .

अक्षरात्परतः परमिदं परब्रह्म। न हि तत्समं कोऽपि न तस्मादधिकं कश्चन्नपि विद्यते। परात्परं – परब्रह्म –पुरुषोत्तमः भगवान् पूर्णपुरुषोत्तमवासुदेवः श्रीहरिः श्रीहरिकृष्ण : श्रीजी महाराजः श्री स्वामिनारायणः इत्यादिभिर्नामभिः परस्य ब्रह्मणः निर्देशोऽस्मिन् दर्शने क्रियते। नामसहस्रैः संस्तूयमानः, श्रुतिभिः सहस्रमुखैः शेषण च स्तूयमानः योगीन्द्रानां ध्यानगम्यः भक्त्यैकलभ्यः, भक्तिसूत्रोपनद्धः नारायणः जीवेशमायाब्रह्मणो नियामकोऽखिलात्मवान्।

शास्त्रेषु परब्रह्मणः सर्वस्वामित्वं, जगज्जनित्राणविनाशहेतुत्वं, सर्वेश्वरत्वं, अखिलहेयप्रत्यनीकत्वं, समस्तकल्याणगुणगणौघत्वं, सर्वाधारत्वम्, स्वरूपज्ञानेतरसमस्तद्रव्यशरीरकत्वं, स्वतः समस्तनियामकचेतनत्वं, सर्वव्यापक चेतनत्वं, स्वरूपतो गुणतश्च यस्मिन्नवधिकबृहत्त्वं तत्त्वम्, मुक्तप्राप्योत्तमपुरुषत्वं इति प्रमुखलक्ष्मैर्निगदितमस्ति स्वरूपम्। अथ च विद्यते भगवतः रूपद्वयेन नृपतिरूपेण साधुरूपेण च तल्लक्षणवर्णनं किन्तु तत्तु गृहितनरवपुषः एव। श्रुतिषु निगदितो चेतनाऽचेतनाऽऽत्मा परब्रह्म

"**एकमेवाद्वितीयं** [2]" वर्तते।

ब्रह्म स्वरूपगुणतश्च जीवेशमायाब्रह्मेभ्यो भिन्नं विलक्षणश्चेति।

---

१- तत्त्वप्रभावलि- पृ. ११-१७

२-त्रिपाद्विभूतिमहानारायणोपनिषत् ३/३

अनंतकोटिब्रह्माण्डनायकानामीश्वराणामपीश्वरं

**"तमीश्वराणां परमं महेश्वरम्**[१]"

इत्यादिश्रुतिशतमुखेन प्रतिपादितं परब्रह्म । व्यापकत्वेऽपि स्वदिव्यधामाक्षरस्थः स्वदिव्यधामाक्षरस्थोऽपि व्यापकः, सर्वकर्तृत्वेऽपि अकर्तृत्वम्, अकर्तृत्वेऽपि सकर्तृत्वम्, सगुणत्वेऽपि निर्गुणत्वं निर्गुणत्वेऽपि सगुणत्वम्, इत्याद्यनेकपरस्परविरुद्धधर्माश्रयं परब्रह्मैव भगवान् पुरुषोत्तम इत्यादिशब्दवाच्यम् ।

भगवता श्री स्वामिनारायणेन परब्रह्मणः स्वरूपवर्णनं नैकेषु वचनामृतेषु कृतमस्तीत्येत् सर्वं व्यक्तीभविष्यति । परात्परं परब्रह्म एकमेवाद्वितीयं वर्तते तथापि वचनामृतेषु मुक्तानां भगवत्साधर्म्यात्तिरुक्ता "**कृष्णवच्च ततो भक्तः**[२]" इति ।

**साम्यं साधर्म्यमित्युक्तं प्राप्नोति परमं स तत् ।**
**न बध्यतेऽतो हरिवत्कर्मभिश्च शुभाशुभैः**[३] । इति ।

"**यथावच्च रमापतेः**[४]" इति च

इत्यादि वचांसि श्रीहरिवाक्यसुधासिन्धावपि भगवत्साधर्म्यं वदन्ति मुक्तानाम् ।

"**मम साधर्म्यमागताः**[५]"। गीतायामभिहितं मुक्तानां साम्यापत्तिः

'**निरञ्जनं परमं साम्यमुपैति**[६]"

"**बहवो ज्ञान तपसा पूता मद्भावमागताः**[७]"।

"**ब्रह्मविद् ब्रह्मैव भवति** " -

इत्यादि श्रौतस्मार्तवचनान्यपि भगवत्समानधर्मत्वं प्रकटयन्ति मुक्तानाम् । एवं संख्यातीतसाधर्म्यापन्नमुक्तानां सत्त्वेऽप्यस्याद्वितीयत्वमक्षुण्णमेव । अन्यथा तस्य समभ्यधिकनिवृत्तिरवरुध्येत । अत एवोक्तं मुनिना शतानन्देन

"**कृष्णः स्वामि सेवकास्ते पुरुषाः पुरुषोत्तमम् ।**
**भजन्तीति विशेषोऽस्ति तत्सारुप्येऽपि सेविनाम्**[८]।।

**कृष्णतुल्यः कृष्ण एव न त्वन्यः कोऽपि पुरुषः ।**
**पारमस्य महिम्नश्च कोऽपि याति न कुत्रचित्**[९]।।

---

१-श्वेताश्वतरोपनिषत् ६/७
२-हरिवाक्यसुधासिन्धुः ६२/१५
३-हरिवाक्यसुधासिन्धुः ८९/११
४-हरिवाक्यसुधासिन्धुः १९९/६२
५-भगवद्गीता १४/२
६-मुण्डकोपनिषत् ३/१/३
७-भगवद्गीता- ४/१०
८-हरिवाक्यसुधासिन्धुः २६०/१३
९-हरिवाक्यसुधासिन्धुः २६०/१४

**अक्षरब्रह्म अपि तत्पारं न याति**[१] । साधर्म्यं नाम ब्रह्मवत् मायापराभवराहित्यमिति राद्धान्तः कालकर्ममायावरणवर्जिताः ब्रह्मीभूताः भूरितेजोमयाङ्गाः मुक्ताः यथा यथा रूपसौन्दर्यमैश्वर्यादिकं वेत्ति पुरुषोत्तमस्य तथा तथा तस्याधिक्यमनुभूयते । यथावत् वेत्ति तथावत्स आप्नोति तथापि तत्कृते परंब्रह्म जीवदशावदेवापारासीममहिमावानेव भवति-

"**अथात आदेशो नेति नेति**[२]"

श्रुतेरपि एतदेवाभिप्रायः

भगवता श्री स्वामिनारायणेन कारि-८ कारि-१० लोया-४- अं-३७- अं-३९ वचनामृतयोः परब्रह्मणः याथार्थ्येनापारत्वमुक्तमस्ति । एतस्यैव परस्य ब्रह्मणः उपास्यत्वं प्रतिपादयन् श्री स्वामिनारायणदर्शनाभिधे स्वकीये ग्रन्थे प्राह श्रीकृष्णवल्लभाचार्य :

"**अथ परब्रह्मोपासीत**[३]"

इति सूत्रेण । तथा चास्य सूत्रस्य कल्याणीवृत्तिः

' **ओम् संसार्यात्मा प्रयोजनाभिलाषी सन्तं धर्मं विदधीत, विवेकं समाददीत, माहात्म्यज्ञानं प्रातन्वीत, निर्वेदं प्रवृण्वीत, उपासनां भक्तिं समभ्यसेत, सत्सङ्गमनुयुञ्जीत, शरणं प्रसुन्वीत, परमपुरुषार्थस्वायत्ती-कुर्वीत, परब्रह्मप्रवृणीत, शश्वतप्रसेवनं प्रस्तुन्वीत, स्वं विशिष्टं प्रमन्वीत, अन्तरात्मानां प्रचक्षीत, परमात्मानंदमाप्नुवीत च**[४]" । इति

एतस्मिन् प्रतिपादने निम्नांकितानि प्रमाणानि सन्ति । तथा हि "आत्मानमेव लोकमुपासीत्"

"**ओमित्येव ध्यायथ आत्मानम्**[५]"।

"**सोऽन्वेष्टव्यः सो विजिज्ञासितव्य :**[६]।"

"**आत्मा वारे दृष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः**[७]"।

"**निचाय्य तन्मृत्युमुखात् प्रमुच्यते**[८]" ।

"**विज्ञाय प्रज्ञां कुर्वीत**[९]" ।

"**अनुविद्य विजानाति**[१०]"।

"**तं पुरुषं विद्यात्**[११]"।

---

१-हरिवाक्यसुधासिन्धुः २६०/१४( भावार्थः )
२-बृहदारण्यकोपनिषत् २/३/६
३-स्वामिनारायणदर्शन सूत्रम् -१
४-तत्रैव कल्याणीवृत्तिरूपकमः
५-मुण्डकोपनिषत् २/२/६
६-छांदोग्योपनिषत् ८/७/१
७-बृहदारण्यकोपनिषत् २/४/५
८- कठोपनिषत् १/३/१५
९- बृहदारण्यकोपनिषत् ४/४/२१
१०-छांदोग्योपनिषत् ८/१२/६
११-बृहदारण्यकोपनिषत् ३/९/१२

**"आत्मानमेव प्रियमुपासीत[१]"।**
**"तमेव विदित्वाऽतिमृत्युमेति[२]"**
**"परं पुरुषमभिध्यायीत[३]"**
**"तज्जलानीति शान्त उपासीत[४]"**

इत्यादौ ध्यानान्वेषणजिज्ञासादर्शनश्रवण-मनन-निदिध्यासन-निश्चयन-ज्ञान-प्रज्ञान-अनुवेदन-विज्ञान-विद्याचिन्तन-सम्परिग्रहणानुष्ठादिपदङ्क -बोध्या ध्रुवास्मृतिर्भक्तिरिति । प्रियतमदर्शनसमान्तरकारतैलधारवदवच्छिन्नध्रुवा-स्मृतिसन्तानध्यानादिभक्तिलभ्यो भगवान्।

अत्र यस्य प्रत्यक्षस्य धृतमानवादिदिव्यवेषस्य श्रीहरेरुपासनभक्तिसेवनादिभिः सुप्रीणनम्। स एव तु प्रसादपात्रं यं यं भक्तं वृणुते स भक्तोऽर्चिरादिमार्गेण दिव्यवाहनस्थ दिव्यमुक्ताद्यतिवाहितः साकारदिव्यचिन्मात्रज्ञानघनकिशोरमूर्तिः सन् ब्रह्मलोकं प्रयाति । गत्वा स जीवः" "**परात्परं पुरुषम्**[५]" परंब्रह्म परमात्मानमुपैति। एतादृशमेव परंब्रह्मणः स्वरूपं विद्यते । स्वयं भगवान् गीतायामगीयत

**"उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।**
**यो लोकत्रयमावेश्य बिभर्त्यव्यय ईश्वर :[६]"॥**

अत्रेश्वरशब्दः परंब्रह्मपरः ।

किञ्च **यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।**
**अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः**[७]॥ इति च ।

इत्युक्तप्रमाणानुसारेण भगवान् एव पुरुषोत्तमः । सोऽयं परमेश्वरो महान् विभूतिरपि अक्षरधामनि नित्यं द्विबाहुः, अन्यत्र स्वभक्तानुकूलस्वेच्छया चतुर्भुजाष्टभुजसहस्रभुजादिरूपं दर्शयति विराहादिष्वनुप्रवेशेण । परस्यैव ब्रह्मणोऽन्तर्यामिरूपप्रवेशेणैवावतारत्वात् तयोरैक्येनैव प्रतिपादनं प्रायःशास्त्रेषु प्राप्यते । परस्य ब्रह्मणः चतुरादिभुजत्वेऽप्यभेदप्रतिपादनं श्रूयते शिक्षापत्र्याम्

**अतश्चास्य स्वरूपेषु भेदो ज्ञेयो न सर्वथा ।**
**चतुरादिभुजत्वं तु द्विबाहोस्तस्य चैच्छिकम्**[८]॥ इति

किञ्च

**स श्रीकृष्णः परंब्रह्म भगवान् पुरुषोत्तमः ।**
**उपास्य ईष्टदेवो नः सर्वाविर्भावकारणम्**[९]॥

---

१-बृहदारण्यकोपनिषत् १/४/८
२-पुरुषसुक्तउतरानुवाक्
३- प्रश्नोपनिषत् ५/५/५
४- छांदोग्योपनिषत् ३/१४/१
५-मुण्कोपनिषत् ३/२/८
६- भगवद्गीता १५/१७
७-भगवद्गीता १५/१८
८-शिक्षापत्री -११२
९-शिक्षापत्री- १०८

श्लोकेनानेनाक्षराधिपतेरनादिश्रीकृष्णस्यैव परंब्रह्मत्त्वमभिहितम् ।

तस्य ब्रह्मत्वं च बृहते: । तथा चास्य श्लोकस्यार्थदीपिकायामुक्तम् । **अपारमहिमात्वात् सर्वेभ्योऽधिकं भवतीति ब्रह्म** [१]। विष्णुपुराणेऽपि महर्षिः पराशरः प्राह

**बृहणत्वाच्च भावानां सकलाश्रयात् ।**
**यस्माद् धारयते भावान् ब्रह्म तेन निरूप्यते** [२]।। इति

यस्मात् कारणाद् ''**मम योनिर्महद् ब्रह्म** [३]'' इति मायाख्याब्रह्मणः, ''**अक्षरं ब्रह्मपरमम्** [४]'' इति गीतावाक्ये प्रोक्तादक्षरब्रह्मणः ''**तेने ब्रह्म हृदाय आदिकवये** [५]'' वाक्योक्ताच्छब्दब्रह्मणश्च परत्वं बोधनाय मूले परं ब्रह्मेति सविशेषणं प्रयोगः । तथा चाहुः श्रुतयोऽपि

''**आदित्यवर्णं तमसः परस्तात्** [६]''
''**अक्षरात् परतः परः** [७]''
''**सर्वे वेदाः यत् पादमामनन्ति** [८]'' इत्यादिकाः ।

भगवान् शब्दस्य मूलस्थस्यायमभिप्रायो वर्तते यत् भगवान् शब्दवाच्या ये गुणाः सन्ति ते समेऽस्मिन् वर्तते । अत एव भगवानिति । तथा चोक्तं श्रीविष्णुपुराणे

''**शुद्धे महाविभुत्याख्ये परे ब्रह्मणि शब्द्यते ।**
**मैत्रेय भगवच्छब्द सर्वकारणकारणे** [९]'' ।। इति किञ्च तत्रैव भगवच्छब्दस्याक्षरार्थोऽपि प्रदर्शितः महर्षिना पराशरेण

''**सम्भर्तेति तथा भर्ता भकारोऽर्थद्वयान्वितः ।**
**नेता गमयिता सृष्टा गकारार्थस्तथा मुने ।।**
**ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः ।**
**ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा ।।**
**वसन्ति तत्र भूतानि भूतात्मन्यखिलात्मनि ।**
**स च भूतेष्वशेषेषु वकारार्थस्ततोऽव्ययः ।।**
**ज्ञानशक्तिबलैश्वर्य वीर्यतेजांस्यशेषत : ।**

---

१-शिक्षापत्री १०८ अर्थदीपिका
२-विष्णुपुराणम् ५/६/१७
३-भगवद्गीता १४/३
४-भगवद्गीता ८/३
५-श्रीमद्भागवतम् १/१/१
६- तैत्तिरीयारण्यकम् ३/१३/१
७-मुण्डकोपनिषत् २/१/२
८-कठोपनिषत् १/२/१५
९-विष्णुपुराणम् ६/५/७२

**भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः ॥**
**एवमेष महाशब्द मैत्रेय भगवानिति ।**
**परंब्रह्मभूतस्य वासुदेवस्य नान्यत्र :**[१]" इति ॥
पुरुषोत्तमशब्दस्यार्थस्तु स्वयमेव भगवान् गीतायां प्राह
"**यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।**
**अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तम :**[२]"॥

अथवा -पूरयति भक्तकामानिति पुरु : । सीदति अवसादयति भक्तविरोधिन इति सः । पुरुश्चासौ सश्चेति पुरुषः । तथा च महाभारतवाक्यम्

**पूरणात् सादनाच्चैव ततोऽसौ पुरुषोत्तम :**[३]।

ईश्वरनिरूपणप्रकरणे लोकाचार्योऽप्याह् "अखिलहेयप्रत्यनीकानन्त-ज्ञानानन्दैकस्वरूपः ज्ञानशक्त्यादि सकलकल्याणगुणगणविभूषितः समस्तजगत्सर्ग स्थितिसंहारकर्ता '**आर्तो जिज्ञासुरर्थार्थी ज्ञानी च**' इत्युक्तचतुर्विधेषु पुरुषाणामप्याश्रयणीयः धमार्थलाभमोक्षरूपचतुर्विधफलप्रदः । विलक्षणविग्रहयुक्त लक्ष्मीभूमिनिलानायकश्च[४]" इति। अनेनापि भगवतो विलक्षण विग्रहयुक्तत्वमभिधीयते। पंण्डित श्रीकृष्णवल्लभाचार्यास्तु-श्रीहरिस्वरूपनिर्णयस्य ग्रन्थस्य सत्सङ्गभाष्ये लिखन्ति-

**यस्त्वानंदघनः सुदिव्यतनुसानन्दस्वरूपो विभुः**
**चान्तः सच्चिदचिदसमन्वितकिशोरानन्दरस्यो रसः ।**
**जीवेशावतारस्वरूपमपगान्तर्यामिसद्ब्रह्मधृक् ।**
**सोऽयं स्वामिनारायणो विजयते श्रीमानवो मूर्तिमान्**[५]॥

किञ्च-

**मुक्तैर्ब्रह्मपुरागमैरभिनुतः संसेवितो धामनि,**
**मायेशैश्च सदा स्तुतोऽतिरमणीयाभिस्वरूपो हरिः ।**
**वैदान्तैः श्रुतिमूलशास्त्रनिवहैर्दिव्याश्रयैश्चेरितः ,**
**सोऽयं श्रीहरिकृष्णधर्मतनयः स्वामी जयत्यन्तवहम्**[६]॥

भगवतः श्री स्वामिनारायणस्य परब्रह्मत्वप्रतिपादयन् श्रीकृष्णवल्लभाचार्य अग्रेऽप्याह -परः प्रभुः सर्वगतोऽन्तरात्मा साधुस्वरुपो मनुजो वृषात्मा मूल स्वरूपोऽत्र पराऽन्तरात्मस्वरूपयोः शास्त्रगतः प्रवर्ण्य : ॥ श्रीहरिस्वरुपनिर्णय-स्यादौ- श्रीगोपालानंद स्वामिन अपि प्राहुः

---

१-विष्णुपुराणम् ६/५/७३-७९
२-भगवद्गीता १५/१८
३-महाभारत उद्योगपर्व ७०/११
४-तत्त्वत्रयम्
५-श्रीहरिस्वरूपनिर्णयसत्सङ्ग भाष्य मंगलाचरणस्य श्लोकः
६-श्रीहरिस्वरूपनिर्णयसत्सङ्ग भाष्य मंगलाचरणस्य श्लोकः

श्रीहरेरनादिदिव्यसिद्धदिव्याकृतित्त्वं, मनुष्यत्वे दिव्यत्वं दिव्यत्वे मनुष्यत्वं, बृहन्नारायणोपनिषदि ''**वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्** '' इति तैत्तिरीयोपनिषद्वाक्यमेतत् - ''**योऽक्षरे सञ्चरति यमक्षरं न वेदेति** ''''**यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वतः**'। ''**अथ पुरुषो ह वै नारायण अकामय प्रजाः सृज**'' इति । '' **चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि**'।'' इत्यादिभिर्वाक्यैः भगवतो स्वामिनारायणस्य परब्रह्मत्वं महतोपष्टम्भेन साधयति। अत एव भगवान् श्रीस्वामिनारायण एव परंब्रह्मेति ।

## ६.२ परब्रह्मणः स्वरूपनिरूपकधर्माः ।

परस्य ब्रह्मणः स्वरूपनिरूपका अनेके धर्मा सन्ति। अथापि तेषु समेषु तस्योभयलिङ्गविशिष्टतैव सर्वप्रधानो धर्मः । उभयलिङ्गविशिष्टत्वं नाम- अखिलहेयप्रत्यनीकत्वम्, अखिलकल्याणगुणगणाकरत्वञ्च । तत्रापि'' अखिलहेयप्रत्यनीकत्वं नाम- तमः प्रतिभटत्वमिव तेजसः, सर्पप्रतिभटत्वमिव च गरुडस्य, विकारादिदोषाणां प्रतिभटत्वम्। इति हि प्राह लोकाचार्यः तत्त्वमेव।

अयमाशयो यत्-प्रत्यनीकत्त्वं नाम प्रतिभटत्वम् । येन प्रकारेण तेजः तमसः प्रबलः शत्रु : यथा वा वैनतेय सर्पाणां प्रबलः शत्रुस्तथैव परंब्रह्मापि दोषाणां प्रबलः शत्रुः । येन प्रकारेण तमः तेजसः सविधे न याति, याति चेत् सद्य एव विनश्यति, यथा वा सर्पः गरुडस्य सविधे न याति, याति चेन्नश्यति, तेनैव प्रकारेण दोषा अपि परमात्मनः सविधे न हि यान्ति । अत एव- सर्वदोषैर्विशुद्धोऽस्ति भगवान्। अत एवस्याखिलहेयप्रत्यनीकत्वमक्षुण्णमेव।

परस्य ब्रह्मणो द्वितीयः स्वरुपनिरूपको धर्मोऽस्ति अखिलकल्याण-गुणाकरत्त्वम् । लोके ये केचनापि ज्ञानानन्दादिकाः कल्याणकरत्वेन ज्ञायन्ते तेषां समेषां कल्याणगुणानामेक एवाश्रयो वर्तते भगवान्। भगवान् यस्मिन् दयते तस्मै स्वकीयानां कल्याणगुणानां अंशविशेषं प्रयच्छति, तेनैवांशविशेषेण सः जीवोऽपि आत्मानं ज्ञानीति मन्यते । परमात्मव्यतिरिक्तानि यानि कान्यपि चेतनतत्त्वानि सन्ति जीवेश्वरब्रह्माख्यानि, तेषु समेषु विद्यमानाः ज्ञानादिकाः समे कल्याणगुणाः परमात्मप्रदत्ता एव, न तु स्वाभाविकाः। परमात्मनः कृपयैव तेषु ते ते गुणा उदियन्ति।

परस्य ब्रह्मणः स्वरूपनिरूपकाणां धर्माणां वर्णनं कुर्वन्ती श्रुतिरप्यभिधते।

''**सत्यं ज्ञामनन्तं ब्रह्म** [२]'' ।

---

[१]-श्रीहरिस्वरुपनिर्णयसत्सङ्ग भाष्यम् पृ. ६-२६

२-तैत्तिरीयोपनिषत् २/१/१

इत्यत्र परस्य ब्रह्मण: त्रयोगुणा अभिहिता: सन्ति। सत्यत्वम्। ज्ञानत्त्वम्। अनन्तत्वञ्च। अनेनायमप्यर्थो भवति निष्पन्नो यद् ब्रह्म सत्यस्वरूपं ज्ञानस्वरूपं अनन्तस्वरूपञ्च वर्तत इति।

अस्तीति सत् सतो भाव: सत्यम्। अनेन परब्रह्मणो सर्वापेक्षयोत्कृष्टं सत्त्वमभिहितं भवति। परब्रह्मण: एव सत्तया तद्व्यतिरिक्तानां सर्वेषां नित्यत्वेनाभिधीयमानानां जीवेश्वरमायाब्रह्मणां सत्ता भवति संरक्षिता। तथा चाह श्रुति:

**"यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रेत्यभिसंविशन्ति तद् ब्रह्म[१]"**

हेतुत्वमप्यभिहितमेव। विना ब्रह्मैतेषां तत्त्वानां सत्तैव न स्यात्। इमानि सर्वाणि तत्त्वानि श्रुतिस्मृतीतिहासपुराणादिषु परस्य ब्रह्मण: शरीरत्वेनाभिहितानि। परञ्च ब्रह्म सर्वेषां चेतनाचेतनात्मत्वेनास्ति श्रवति :। तथा च श्रुति:

**"सन्मूला: सौम्येमा: सर्वा: प्रजा: सत्यप्रतिष्ठा:[२]"।**

इत्थं सर्वेषामेव तत्त्वानां यस्मात् कारणात् परब्रह्मण: सत्तायुक्तैव सत्ता भवति, तस्मादेव कारणात् तस्य सत्यत्वेनाभिधानं करोति श्रुति:।

यत्तु ज्ञानस्वरूपं ब्रह्माह श्रुतिस्तस्यायमभिप्रायो वर्तते यत् - परंब्रह्मैव स्वाभाविकरूपेण सर्वज्ञ:, तद्व्यतिरिक्तमुक्तादिनां यत्सर्वज्ञत्वादिकं गुणं भवति तत् परमात्मन: कृपयैव। श्रुतिरप्याह -

**"य: सर्वज्ञ: सर्ववित्[३]"।**

**"परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च[४]"। "विज्ञातारमेकेन विजानीयात्[५]"।**

आभि: श्रुतिभि: परस्य ब्रह्मण: सर्वज्ञता, सर्वशक्तिमत्ता, ज्ञानबलयो: क्रियाणां स्वाभाविकत्वमप्यभिहितम्।

परस्य ब्रह्मण: ज्ञानशक्त्यादिका: कल्याणगुणा: नित्या अनवधिका - संख्या-निरूपाधिका-निर्दोषा-समभ्यधिकरहिताश्च। परमात्मन: कल्याणगुणेष्वेव ऐश्वर्यं, वीर्यं तेज:, बलं, वात्सल्यं, अभयप्रदातृत्वादय: सन्ति। सत्यकाम-सत्यसङ्कल्पादिका अपि भगवत: कल्याणगुणेष्वेवाभान्ति। एतस्मादेव कारणात् -परब्रह्मण: ज्ञानानन्दैकस्वरूपता स्वीक्रियन्ते। आनन्दरूपज्ञानात्मकत्वमेव ज्ञानानन्दैकरुपत्वमभिधीयन्ते। तच्च कात्स्र्येन अनुकूलत्वे सति स्वयं प्रकाशत्व-मिति। इमे समे ये गुणा अत्र समुपवर्णिता: ते ज्ञानस्यैव विततीभूता: सन्ति।

---

१-तैत्तिरीयोपनिषत् ३/१
२-छांदोग्योपनिषत् ६/८/४
३-मुण्डकोपनिषत् १/१/९
४-श्वेताश्वतरोपनिषत् ६/८
५-बृहदारण्यकोपनिषत् २/४/१४

एतत्सर्वमेव श्रुतौ। "**ज्ञानम्**" पदेनाभिहितमस्ति।

परब्रह्मणः स्वरूपनिरूपिकायाः श्रुतेस्तृतीयं पदम्-**अनन्तम्**" इति विद्यते -त्रिविधपरिच्छेदराहित्यमेवानन्त्यमित्यभिधीयते-त्रिविधपरिच्छेदो हि-देशपरिच्छेदः, कालपरिच्छेदः, वस्तुपरिच्छेदश्च। यस्मात् कारणात् परंब्रह्म न तु कस्मिंश्चित् देशविशेष एव, न वा कालविशेष एव अथवा वस्तुविशेष एव विद्यते। अस्ति तत्परंब्रह्म, सर्वदेशसर्वकालसर्ववस्तुव्यापकं ब्रह्म। अत एवास्य परस्य ब्रह्माणोऽनन्तत्वं सिद्धयत्येव। एतन पर्यालोचनेनायमप्यर्थः सिद्धो भवति - अनन्तत्वं नाम नित्यत्वे सति चेतनाचेतनव्यापकत्वे सति अन्तर्यामित्वमिति।

आनन्त्यगुणसम्पन्नतापि परस्य ब्रह्मणः स्वरूपनिरूपकः। येन प्रकारेण ब्रह्मस्वरूप अनन्तो वर्तते, तेनैव प्रकारेण तत् गुणतः, नामतः, स्थानतोऽप्यनन्तं विद्यते। तस्य परस्य ब्रह्मणः गुणानां अनतन्ता विद्यते, तस्य नामान्यप्यनन्तानि। इदं परंब्रह्म अनन्तप्रदेशपर्यन्तं व्यापकं वर्तते। इदं परब्रह्म एकरसमूर्तिर्विद्यते। तथा च सूत्रम्

"**एकरसमूर्तित्वात्**[१]" इति।

अस्य सूत्रस्य कल्याणीवृत्तौ श्रीकृष्णवल्लभाचार्यो लिखति यत् "

"**रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति, एष ह्येवानन्दयति**[२]" **अन्योऽन्तर आत्मानन्दमयः तनैव पूर्णः पुरुषविधः**[३]" "**सैषाऽनन्दस्य मीमांसा भवति, स एको ब्रह्मण आनंदः, एतमानन्दमयमात्मानमुपसंक्रामति, आनंदं ब्रह्मणो विद्वान्**[४]"। "**आनंदरूपममृतं यद् विभाति**[५]"। **आनन्दात् खल्विमानि भूतानि जायन्ते**[६]"। **सर्व रसः**[७]।""**एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति**[८]""**परम आनंद एव ब्रह्मलोकः**[९]" **विज्ञानमानन्दं ब्रह्म**[१०]"। इमानि सर्वाणि वाक्यानि परस्य ब्रह्मण आनंदस्वरूपतामभिदधति। एक रसमूर्तित्वादिति सूत्रस्य कल्याणीवृतौ वृत्तिकारे लिखति-**परमात्मनो रसस्वरूपस्यानन्दरस एव रूपस्य सर्वरसरूप वर्णनात्**[११]"।

परमात्मगुणानां शाश्वतत्त्वं प्रतिपादयन् श्रीकृष्णवल्लभाचार्यो प्राह

"**शाश्वतगुणवत्त्वात्**[१२]"

इत्यस्य सूत्रस्य कल्याणीवृत्तौ स लिखति-

---

१-श्री स्वा. दर्शनम् सूत्रम् ५
२-तैत्तिरीयोपनिषत् आनंदवल्ली ७
३-तैत्तिरीयोपनिषत् आनंदवल्ली ५
४-तैत्तिरीयोपनिषत् आनंदवल्ली ८
५-मुण्डकोपनिषत् २/२/७
६-तैत्तिरीयोपनिषत् भृगुवल्ली ६
७-छांदोग्योपनिषत् ३/१४/४
८-बृहदारण्यकोपनिषत् ४/३/३२
९-बृहदारण्यकोपनिषत् ४/३/३३
१०-बृहदारण्यकोपनिषत् ३/९/२८
११-स्वा. दर्शनम् पञ्चमसूत्रस्य कल्याणीवृतिः
१२. स्वा. दर्शनम् सूत्रसंख्या ८

"परब्रह्मणि ज्ञानशक्तिबलैश्वर्यवीर्यतेजसो-षड्भगानां शाश्वतत्त्वं सार्वज्ञ्यं तृप्यनादिबोधस्वातन्त्र्य नित्याऽलुप्तदृष्ट्यनन्तशक्तीनां च शाश्वतत्वं, साम्याऽसंगादिगुणानां शाश्वतत्वम्, अपहतपापमत्वविजरत्व-विमृत्यत्व-विशोकत्व-विजिघित्सत्त्वाऽपिपासत्व -सत्यकामत्वसत्यसंकल्पत्वानां च शाश्वतत्वं, सत्यशौचाद्येकोनचत्वारिंशद् गुणानां शाश्वतत्त्वम् । अभयं सत्त्वसंशुद्धयाद्यष्टविंशतिगुणानां शाश्वतत्वं, कृपाल्वकृतद्रोहादीनां द्वात्रिंशद्गुणानां शाश्वतत्त्वम्, एवमसंख्यगुणानां शाश्वतत्वं वर्तते भगवति श्रीस्वामिनारायणे,[१] " इति । "इत्थं परस्य ब्रह्मणः स्वरूपं निरूपितिं यथामति "।

## ६.३ परब्रह्मणो गुणनिरूपकाः धर्माः ।

परब्रह्मणो ये ये गुणाः सन्ति तेषां निरूपणमत्र क्रियते । परब्रह्मसकलकल्याणगुणानामाश्रयो विद्यत इति तु उपर्येवाभिहितम् । परञ्च तेषां गुणानां नामानि कानि ? केन प्रकारेण च तान्यभिव्यक्तानि भवन्तीति विचार्यतेऽत्र।

परस्य ब्रह्मणो गुणेषु प्रथममायाति तस्य स्वेतरसमस्तवस्त्वपेक्षया बृहत्त्वम् । बृहत्वम् । बृंहणत्वञ्च

"**बृहत्त्वाद् बृंहणत्त्वाच्च तद् ब्रह्मेत्यभिधीयते**[२]"

इत्याह महर्षि बादरायणः । श्रुत्यप्यभिधते-"**बृहति बृंहयति ब्रह्म**[३]" । अयमाशयो यत् यस्मात् कारणात् परं ब्रह्म स्वेतरसमस्तवस्त्वपेक्षया बृहद महद् वर्तते । तस्मादेव तत् परं ब्रह्मेत्यभिधीयते ।

"**अणोरणीयान् महतो महीयान्**[४]"

इति श्रुतिरप्यस्य सर्वापेक्षया महत्त्वमभिधत्ते ।

किञ्च परमात्मायं स्वेतरसमेषां वस्तुनामन्तःप्रविष्टो वर्तते, अत एवास्यात्मत्वमपि सिद्धयति । भगवान्नपि गीतायां, प्राह-

"**ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति**[५]"। इति

परंब्रह्म भगवानिति शब्देनैतस्मादेव कारणादभिधीयते यत् तस्मिन् षट्संख्याकाः भगाः वर्तन्ते । महर्षि हारीतोऽप्याह-

"**ऐश्वर्यं च तथा वीर्यं तेजः शक्तिरनुत्तमा ।**
**ज्ञानं बलं षडेते च षण्णां भग इतीरणा ।।**"
**एभिर्भगैः संयुक्तो भगवान् इति प्रोच्यते**[६]। इति

---

१-तत्रैवकल्याणीवृत्तिः
२- जनमङ्गलस्तोत्रभाष्य उद्धृतम्
३- जनमङ्गलस्तोत्रभाष्य उद्धृतम
४-कठोपनिषत् २/२०
५- भगवद्गीता १८/६१
६-बृहद्हारीतस्मृतिः ४/१८-१९

महर्षिः पराशरोऽप्याह-

**"शुद्धे महाविभूत्याख्ये परे ब्रह्मणि शब्द्यते ।**
**मैत्रेय भगवच्छब्द : सर्वकारणकारणे[१]"।** इति ।

किञ्च भगवतो गुणानां वर्णनं कुर्वता नारायणाष्टककारेणाभिहितम् ।

**"वात्सल्यादभयप्रदानसमयादार्तार्तिनिर्वापणाद्,**
**औदार्यादघशोषणादगणित श्रेयः पदप्रापणात्[२]"** ।

भगवतो गुणानां वर्णनप्रसङ्गे स्तोत्ररत्नाकरकारः श्रीमदुदयनाचार्योऽप्याह

**"वशीवदान्यो गुणवानृजुः शुचिः,**
**मृदुर्दयालुर्मधुरः स्थिरः समः ।**
**कृतिकृतज्ञस्त्वमसि स्वभावतः,**
**समस्तकल्याणगुणाऽमृतोदधिः[३]॥"** इति ।

श्रीयोगानंदमुनिरप्याह

**"शमदमकौशलस्मृतितपोबलकान्तिभग**
**श्रुतशुचिसत्यतास्ववशतार्जवकीर्तिमुखाः ।**
**अपरिमिता गुणा ध्रुवतयात्र वसन्ति सदा**
**हृदि तमजं भजे भवहरं हरिकृष्णमहम्[४]॥"**

भगवतो गुणानां सम्यग्वर्णनं पूज्य श्री घनश्यामचरणदासेन आध्यात्मिकतत्त्वाख्याने द्वाविंशाध्याये १५० श्लोकेषु कृतं वर्तते ।

यथायथं गुणानां ज्ञानापेक्षाचेत्तत् विशेषेण पठनीयम् । तैरुक्तं

**षाड्गुण्यमेषु मुख्यं तु वासुदेवस्य कीर्तितम् ।**
**तत्कुक्षौ गर्भिता ह्यन्ये गुणा देवे यथा जगत्[५]॥**

**ज्ञानं यथा**

**यतः सर्वं सर्वथा च सर्वदा प्रेक्षते स्वतः ।**
**ज्ञानं नाम गुणः सोऽयं श्रीहरेः सर्वसाक्षिणः[६]॥**

इत्यादि पञ्चश्लोकेषु प्रतिपादितम् ।

**शक्तिर्यथा-**

**महती शक्तिरेतस्य विचित्रा विविधा श्रुता ।**
**यया त्वघटितं सर्वं घटयत्यन्यदुष्करम्[७]॥**

---

१-विष्णुपुराणम् ६/५/७२
२-नारायणाष्टकम्
३-स्तोत्ररत्नम् १८
४-योगानंदमुनिकृतं स्तोत्रम्
५-आध्यात्मिकतख्यानम् २२/५
६-आध्यात्मिकतख्यानम् २२/६
७-आध्यात्मिकतख्यानम् २२/७
८-आध्यात्मिकतख्यानम् २२/१२

इत्यादि पञ्चश्लोकेषु प्रतिपादिता ।

**बलं यथा-**

**श्रमहानिस्तु या तस्य सततं व्यापृतस्य च ।**
**बलनामा गुणः प्रोक्तो गुणतत्त्वविचिन्तकैः [१]॥**

इत्यादि श्लोकत्रयेण प्रतिपादितम्

**ऐश्वर्यं यथा-**

**कर्तृत्वमस्य स्वातन्त्र्यादनपेक्ष्येतरत् पुनः ।**
**ऐश्वर्यं कथितं सद्भिः स्वाधीनस्य सदा प्रभोः [२]॥**

इत्यादि चर्तुभिः श्लोकैरुक्तम्

**वीर्यं यथा-**

**विकारहेतोः सत्त्वेऽपि विकारविरहो हि यः ।**
**वीर्यं नामो गुणस्तस्य महावीर्यस्य कथ्यते [३]॥**

इत्यादि द्वादश श्लोकेनोक्तम्

**तेजो यथा ।**

**पराभिभवसामर्थ्यं तेजश्चास्य महच्छुतम् [४]।**

इत्यादिकषड्श्लोकेनोक्तम् । यद्यपि भगवतो गुणानामानन्त्यं वर्ततेऽतः तद् वर्णनाय न कोऽपि क्षमः । अत एवोक्तं

**इषुक्षयान्निवर्तन्ते नान्तरिक्षक्षितिक्षयात् ।**
**मतिक्षयान्निवर्तन्ते न हरेर्गुणक्षयात् [५]।** इति ।

तत्र सौशील्यं, वात्सल्यं, कारुण्यं, दयादीनां यद् वर्णनं वर्तते तदपि ममातीव रुचिकरं वर्तते । उदाहरण रूपेण वात्सल्यस्योल्लेखो क्रियतेऽत्र -

**अपराधसहस्त्राणां चिन्तनात् बिभ्यतां सताम् ।**
**हस्तावलम्बं कुरुते हरेर्वात्सल्यमुत्तमम् [६]॥**

भगवतो गुणानां वर्णन कुर्वन् यतीन्द्रमतदीपिकाकारोऽप्याह''

''तत्र ज्ञानं नाम सर्वसाक्षात्काररूपम् । शक्तिः अघटितघटनासामर्थ्यम् । बलं धारणसामर्थ्यम् । ऐश्वर्यं नियमनसामार्थ्यम् । वीर्यमविकारित्वम् । तेजः पराभिभवनसामार्थ्यम् । महतो मन्दैस्सह नीरन्ध्रेण संश्लेषस्सौशील्यम् । वात्सल्यं दोषेऽपि गुणत्वबुद्धिः, दोषादर्शित्वं वा । आश्रितविरहासहत्वं मार्दवम् । मनोवाक्कायैकरूपत्वमार्जवम् । स्वसतानपेक्षतद्रक्षापरत्वं सौहार्दम् ।

---

१-आध्यात्मिकतख्यानम् २२/ १७
२-आध्यात्मिकतख्यानम् २२/ २०
३-आध्यात्मिकतख्यानम् २२/ २४
४-आध्यात्मिकतख्यानम् २२/ ३४
५- तत्त्वमुक्ताकलाप-सर्वंकषाव्याख्यायामुद्धृतः
६-आध्यात्मिकतख्यानम् २२/ ६०

अभिजनवृत्तगुणाद्यपेक्षया सर्वाश्रयणित्वं साम्यम् । स्वार्थनिरपेक्षपरदुःख-निराचिकीर्षा कारुण्यं परदुःखासहिष्णुत्वं वा । क्षीरवदुपायभावेऽपि स्वादुत्वं माधुर्यम्। भक्तानुग्रहवदानन्त्यत्वादेशमूलतो दुःखगाहत्वं गाम्भीर्यम्। अपरिमितं दत्त्वाप्यतृप्तमौदार्यम् । आश्रितदोषगोपनं चातुर्यम् । अकम्पनीयत्वं स्थैर्यम् । अभग्नप्रतिज्ञत्वं धैर्यम्। परब्रह्मप्रवेशसामर्थ्यं शौर्यम्। तन्निराकरणं पराक्रम :[1]"

इमे समे गुणाः भगवति समुपलभ्यते यथायथम्।

## ६.४ परब्रह्मणोऽन्वयव्यतिरेकेणस्वरूपनिरूपणम्

मुक्तेषु सार्ष्टिसाम्येऽपि सर्वनियामकत्वस्य परमेश्वर एव सत्त्वम्। परमेश्वरे च मुक्तनियाम्यत्वस्य भावः, अक्षरब्रह्मण्यपि मुक्तनियाम्यत्वभावो वर्तते । अत एव मुक्तेष्वक्षरे चापि नियामकत्वस्याभाव एव परंब्रह्म त्वेकमेव । परंब्रह्म मुक्तानक्षरब्रह्म च लीनीकृत्य स्वराट्स्वरूपतया वर्तने समर्थमास्ते । अत एव सर्वनियामकत्वं परस्मिन् ब्रह्मणि स्वेतरसमस्ततत्त्वेभ्यो व्यतिरिच्यते। तथा चोक्तं श्रीहरिवाक्यसुधासिन्धौ

**"स्वाऽऽवासमक्षरमपि प्रत्याकृष्यात्मनि स्वयम् ।**
**निजशक्त्यैव तान् धर्तुं स्वतश्च क्षमतेऽखिलान्**[2]॥"

अत एव परस्मिन् ब्रह्मणि सर्वनियामकत्वमेव परस्य ब्रह्मणो महासामर्थ्यम्। निरालम्बनोपनिषद्यपि प्रोक्तम् –**ब्रह्मश्रीहरेः प्रकृतिमाश्रित्य लोकान् सृष्ट्वा प्रविश्यान्तर्यामी नियन्ता च**[3]"इति।

**"अथ परात्परं पुरुषमुपैति दिव्यम्**[4]"

**"स वा एष पुरुषविध एव**[5]"

**"हिरणमय पुरुष एकहंसः**[6]"

**"नारायणः साकार आनंदप्राधान्येनाऽऽनंदसाकारः** "आभिःश्रुतिभिः परस्य ब्रह्मणः साकारत्वं सिद्धम् । साकारमपि किशोरमूर्ति, तत्र किशोर मूर्ति त्वादेकदेशवर्ति । एकदेशवर्तित्वादेव तस्य सर्वत्र सत्त्वस्याभाव : । तेनैव तस्य सर्वनियामकत्वमपि प्रतिषिद्धं भवति । अनुपतिष्ठतोऽनन्तिकस्य परोक्षस्य वा नियामकत्वानुपपत्ते : । इति परस्य ब्रह्मणः सर्वनियाम्यत्वं सुतरामनुपपन्नमेवेति चेन्न ।

---

१-यतीन्द्रमतदीपिका - पृ. १३१
२-हरिवाक्यसुधासिन्धुः - ११/३६
३-निरालंबनोपनिषत् -
४-मुण्डकोपनिषत् -३/२/८
५-तैतरियारण्यकम् -२/२
६-बृहदारण्यकोपनिषत् - ४/३/१२

''**तथाप्यन्वयिव्याप्तिमत्वात्**[१]'' इति अयमाशयो यत् यद्यपि परंब्रह्म एकमेव तिष्ठति ' इति किञ्च स्वेतरसमस्तवस्तुविलक्षण स्वयमपि वर्तते। अथापि तत् स्वसत्तया वा शक्त्या वा प्रकाशेन वा शरीरित्वेन वा विविधरूपत्वेन वा सर्वत्रान्वयि भवति । तत्तद् द्वारात्मकाऽऽन्वयेन तत्र तत्र सर्वत्र व्यष्ट्यै च सहभावात्मकव्याप्तेः नैयत्यं वर्तते परस्य ब्रह्मणः । तथाहि- यत्र तादात्म्येन परब्रह्म तत्र शाश्वतगुणत्वेन परब्रह्म, यत्र धाम तत्राऽऽश्रयताऽधारतायोरन्यतरत्वेन धामि, यत्र मुक्ताः तत्र स्वीयानन्दाऽशनवत्त्वेन परब्रह्म । यत्रवतारास्तत्र स्वत्वस्वीयत्वेन परब्रह्म । यत्र माया तत्र स्वसंकल्पितसृष्ट्युपादानत्वेन तादृशोपादानतास्वरूपयोग्यत्वेन परब्रह्म । यत्रेश्वर : तत्र सार्वज्ञ्यकर्तृत्वादित्वेन परब्रह्म । यत्र जीवेशाः तत्र स्वनिष्ठित कर्मफलप्राप्तिमत्तया परब्रह्म । यत्र स्वेतरत् तत्र स्वशरीरत्वेन परब्रह्म । यत्र विशेषणता तत्र स्ववृत्तित्वेन परब्रह्म । यत्र चैतन्यं तत्र स्वान्तर्यामि शक्तिमत्त्वेन स्ववृत्तित्वेन परब्रह्म । यत्र चैतन्य तत्र स्वान्तर्यामि शक्तिमत्त्वेन परब्रह्म । यत्र कार्यत्वं तत्र सर्वथा कारणता निरूपत्वेन परब्रह्म यत्र धर्मत्वं तत्र आधेयत्त्वेन परब्रह्म । यत्र पदार्थत्वं तत्र ज्ञेयत्वेन परब्रह्म ।

अस्मिन् प्रतिपादने निम्नांकितानि वचांसि प्रामाण्यमश्नुवन्ति ।'' **एतदात्म्यमिदं सर्वम्**[२]'' इत्येन विभिन्नाः व्याप्तयः उद्भाव्याः । '' **तस्य भासा सर्वमिदं विभाति**[३]'' इत्येनन यत्र विभास्यं तत्र प्रभावत्वेन परब्रह्मेति ''**तत्सृष्ट्वा तदेवानुप्राविशत्**[४]'' इत्यनेन यत्र सृज्यं तत्राऽनुप्रवेशवत्तया परब्रह्म। ''**रूपं रूपं प्रतिरूपो बभूव**[५]'' इत्यनेन यत्र रूपं प्रतिरूपतया परब्रह्मेति । **विश्वतश्चक्षुरुत विश्वतो मुखो**[६]'' ''**सर्वतः पाणिपादम्**[७]'' इत्यनेन यत्र विश्वतो दृश्यं तत्र प्रत्यक्षविषयतया परब्रह्मेति ।'' **स काल-कालः**[८]'' इत्यनेन यत्र परिणामः तत्र कालशक्तशक्त्या परंब्रह्म । अनेन प्रकारेण व्याप्त्य अपि ऊह्याः। यत्र वाच्यत्त्वं तत्र परमेश्वराभिधेयत्वम् ।

किञ्चान्तर्यामि ब्राह्मणेऽन्तरात्मतयाव्यापकत्वमभिहितम् । अत्र स्वामिनारायणदर्शनस्य सूत्रम् ।

''**अन्तरात्मतयाऽऽवश्यकत्वात्**[९]''

परस्य ब्रह्मण आऽत्मत्वे निम्नांकितानि प्रमाणानि भवन्ति'' **एको वशी**

१-स्वामिनारायणदर्शन सूत्रम् १५
२-छांदोग्योपनिषत् ६/९/४
३-मुण्डकोपनिषत् २/२/१०
४-तैत्तिरीयारण्यकम् - ६
५-कठवल्ली २/२/९ + १०
६-श्वेताश्वतरोपनिषत् ३/३
७-श्वेताश्वतरोपनिषत् ३/१६
८-श्वेताश्वतरोपनिषत् ६/१६
९-स्वा. दर्शनम् सूत्रम् १६

**सर्वभूतान्तरात्मा** [१]''। **यत्साक्षादपरोक्षाद् ब्रह्म, य आत्मा सर्वान्तरः** [२]'' सूत्रं ''**विद्यात् तमन्तर्यामिणमिति, स ब्रह्मवित्, स लोकवित् स देववित्, स भूतवित् स आत्मवित् स सर्ववित्** [३]''।

किञ्च बृहदारण्यकोपनिषदः तृतीयाध्यायस्यान्तर्यामिब्राह्मणे उद्दालक आह-**याज्ञवल्क्यान्तर्यामिणं ब्रूही** [४]''**ति**। तस्योत्तररूपेण महर्षिः याज्ञवल्क्याह- ''**यः पृथिव्यां तिष्ठन् पृथिव्यां अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथ्विमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतःयोऽप्सु तिष्ठन् अद्भ्योऽन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः । योऽग्नौ तिष्ठन्नेतरन्तरो यमग्निर्नवेद, यस्याग्निःशरीरं योऽग्निमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः। योऽन्तरिक्षे तिष्ठन् अन्तरिक्षादन्तरो, यमयत्येष त आत्मान्तर्याम्यमृतः** [५]। ''अनेन प्रकारेण सम्पूर्णेऽस्मिन्नन्तर्यामिब्राह्मणे महर्षिः याज्ञवल्क्यः परस्य ब्रह्मण अन्तर्यामित्वेन निरुप्य, अस्य ब्रह्मणस्यान्तिमे मन्त्रे परब्रह्मणो निरुपणमुपसंहरन् प्राह - **अद्रष्टो द्रष्टा - अश्रुतो श्रोता, अमतो मन्ता अविज्ञातो विज्ञाता नाऽन्योऽतोऽस्ति द्रष्टा, नाऽन्योऽतोऽस्ति श्रोता, नाऽन्योऽतोऽस्ति मन्ता, नान्योऽतोऽस्ति विज्ञातैष त आत्मान्तर्याम्यमृतोऽन्यदार्तम्** [६]।''

अनेनैव प्रकारेण तैत्तिरीयारण्यकेऽपि प्राह-''**अन्तः प्रविष्ट शास्ता जनानां सर्वात्मा** [७],''। शतपथ ब्राह्मणेऽपि-**य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद, यस्यात्मा शरीरं य आत्मानमन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः** [८]। परस्य ब्रह्मणः ब्रह्मशारीरत्वं, अहंकारशरीरत्वं, चित्तशरीरत्वं, अव्यक्तशरीरत्वं, अक्षरशरीरत्वं, मृत्युशरीरत्वं, प्रतिपाद्याभिहितम्।''**स एव सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देवो एको नारायण** [९]'' इति।

अनेन प्रतिपादनेनायमर्थो भवति सिद्धो यत् परंब्रह्म व्याप्तिं विना ज्ञानक्रियेच्छाशक्तिनामुद्बोधो न भवति । यस्मात् कारणात् सर्वेषु तत्त्वेष्वन्तर्यामितया स्थितमपि ब्रह्म तेभ्यः व्यतिरिक्तमपि भवति, तस्मादेव कारणात्तस्यान्वयव्यतिरेकित्वं सिद्धं भवतीति शम्।

---

१-कठोपनिषत् २/२/१२
२-बृहदारण्यकोपनिषत् ३/४/१
३-बृहदारण्यकोपनिषत् ३/७/१
४-बृहदारण्यकोपनिषत् ३/७/२
५-बृहदारण्यकोपनिषत् ३/७/३-६
६-बृहदारण्यकोपनिषत् ३/७/२३
७-तैत्तिरीयारण्यकम् ३/११-२
८-शतपथ ब्राह्मणम् १४/६/५-३०
९-सुबालोपनिषत् खंड -७

## ६.५ "परब्रह्मणो दिव्यसाकारविग्रहः"

कश्चन यदि शंकेत्-यदि परंब्रह्म स्वधामनि वर्तते तदा तस्य परस्य ब्रह्मणः भक्तजनसाजात्यर्थं, तेषां सेवाग्रहणार्थं दिव्यतनुमत्त्वं स्यादेव। एवं च सति तस्य परस्य ब्रह्मणो मायाधीनत्वं, किञ्च लुप्तसामर्थ्यकत्वमपि स्यात् किञ्च तस्य परब्रह्मणो प्रोक्तसातत्यमपि हीयेत दिव्यत्वमपि नश्येत् अत्रोच्यते सूत्रम्

**"अत्राप्यनादिनित्यसिद्धदिव्यत्वात्[१]"**

अयमाशयो यत् यद्यपि श्री भगवाँल्लोकेऽप्यस्मिन् आगत्य दिव्यतनुं धत्ते, अथापि तस्य धामनि राहित्यं न हि भवति। सर्वशक्तिसम्पन्नस्य परब्रह्मणः सर्वकर्तुसमर्थत्वात्। यदा परंब्रह्म दिव्यनिजशरीरेणाऽस्मिँल्लोके भवति, तदापि तत् स्वशक्त्या परस्मिँल्लोके विद्यमानमेव भवति।

किञ्चात्राविर्भावेऽपि तदीयावयवादपेक्षितकृत्स्नव्यूहाविर्भावेन तदनुगुण-मायिकतत्त्वग्रहणेन तेषां तच्छीलशक्तिस्वभावापत्तीकरणेन, वास्तवस्वरूपेण भगवतः तनोः दिव्यत्वं भवत्येव। तथा चोक्तं भागवते

**'भूभारः क्षपितो येन तां तनुं विजहावजः।'**

**कण्टकं कण्टकेनैव द्वयं चाऽपीशितुः समम्**[२]॥ इति।

किञ्च-

**यथा मात्स्यादि रूपाणि धत्ते जह्यात् यथा नरः**[३]।

लौकिक रीत्या त्यागदर्शनम्। दिव्यस्वरूपणां तु

**"तत् तत् कार्याय धत्ते स्वं सकलैश्वर्यमत्यजन्[४]"** इति।

हरिवाक्यमसुधासिन्धावभिहितम्। अन्यत्रापि हरिवाक्यसुधासिन्धावेवोक्तम्।

**'सकलैश्वर्यपूर्णस्यान्नराकारोऽपि स ध्रुवम्[५]'**

'इत्यनेनाऽयमर्थोऽभूत् प्रोक्तो यल्लोके मानवादिशरीरस्वीकारेऽपि भगवान् स्वकीयदिव्यैश्वर्येण सम्पन्न एव भवति। तस्य नित्यसिद्धदिव्यता कदापि न हीयेत।

**"अतः स सकलैश्वर्यसम्पन्नो हि नराकृतिः[६]।"**

अयमपि श्लोको भगवतः श्री स्वामिनारायणस्य धृतमानवशरीरस्य सकलैश्वर्य-सम्पन्नतामेव समर्थयति।

भगवतः स्वामिनारायणस्य ये भक्ताः येऽलब्धभगवत्कृपा जना आसन्

---

१-स्वा. दर्शन सूत्रम् २८
२-श्रीमद्भागवतम्--भाग-१/१५/३४
३-श्रीमद्भागवतम् १/१५/३५
४-हरिवाक्यसुधासिन्धुः १२६/२९
५-हरिवाक्यसुधासिन्धुः १२६/२९
६-हरिवाक्यसुधासिन्धुः २९/३३

ते समे सामान्यमनुष्यरूपेणाद्राक्षिसुः इति प्राह "**भक्तदृग्भिर्दर्शनभेदस्तु**[१]" इति सूत्रेण श्रीकृष्णवल्लभाचार्य : । तथा चास्य सूत्रस्य कल्याणीवृत्ति - हरिकृष्णभगवतो दिव्यमानववेषस्वरूपस्यैकस्वरूपस्याऽपि मकरालयपत्तने मयारामभट्टादीनां दिव्यविष्णुस्वरूपदिव्य श्रीकृष्णनारायणस्वरूपदर्शनं ग्रामीणानां स्थूलदृष्टिनामकृपापात्राणां तु सहजानन्दस्वामिस्वरूपदर्शनं समाधिमाप्तानां भिन्नभिन्नसाम्प्रदायिकानां तु महागणपतिहिरण्यपुरुषनरनारायण शेषशायिवासुदेव भूमपुरुषरामचन्द्रश्रीकृष्णतीर्थङ्करेशपेगम्बरेश श्री स्वामिनारायणादिविभिन्न स्वरूपदर्शनमभूत्, बलेर्वामनविराट्स्वरूपदर्शनमन्यदैत्यानां तु बटुवामन स्वरूपदर्शनं, श्रीकृष्णस्य रंगगतस्य भिन्नभिन्नदृशां वज्रांगनरेशस्मरगोपशास्तृसुतमृत्यु विराट्परतत्त्वपरदैवतादिस्वरूपदर्शनम्, भक्तानां दृशां भिन्नशक्तिकतया तद्योग्यग्राह्यस्वरूप-दर्शनदानेन भिन्नभिन्नमूर्तिदर्शनस्याऽपि जायमानत्वात्, ब्रह्मदृष्टेस्तु एकस्याऽपि विशिष्टस्य परात्मनः रूपरूपप्रतिरूपदर्शनसंभवात्, एकस्याऽपि भक्तस्य चतुर्विंशतिमूर्तिस्वरूपदर्शनसंभवात्, पार्थस्याऽनेका-कारवैराजदर्शनस्य गीतायां कथितत्वात्, भगवत एवाऽयं सर्वोऽपि भेददर्शनवैभव चमत्कारः [२]।

श्री गोपालानंद स्वामी तु श्रीहरिस्वरूपनिर्णयः नामके ग्रन्थे मनुष्यत्वे दिव्यत्वं श्रौतस्मार्तवचोभिः समर्थयामास। एतस्मिन् ग्रन्थे श्री स्वामिगोपालानंदो वक्ति "**मनुष्यत्वे दिव्यत्वं, दिव्यत्वे पुनर्मनुष्यत्वं बृहन्नारायणोपनिषदि वृक्ष इव स्तब्धो दिवि तिष्ठत्येकः तेनेदं पूर्णं पुरुषेण सर्वमिति**[३]"। तैत्तिरीयोपनिषद् वाक्यमेतत् '**यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वतः**[४]"। इति। अयमर्थो यत् परब्रह्म परमात्मा स्वरूपः सन् दिव्यानन्दघनमूर्तिरक्षरधाम्नि प्रत्यक्षो विराजते। सर्वं साक्षात् पश्यति, सर्वविषयकविशेषज्ञाता सर्वविषयकसामान्यज्ञाता च। युगपत्समक्षणावच्छेदेन। विशेषत्त्वेन, सामान्यत्वेन च केवलान्वितत्वेन व्यष्टित्वेन, विशेषणत्वने, संसर्गत्वेन, विषयत्वेन, विषयीत्वेन, ज्ञानत्वेन, ज्ञेयत्वेन, ज्ञप्तित्वेन ज्ञातृत्वेन च प्रत्यक्षीकरोति हस्तामलकमिवाऽपरपारं पश्यति। वेत्ति प्रत्यक्षीकरोति। "**अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृज**" इति "**चरणं पवित्रं विततं पुराणं येन पूतस्तरति दृष्कृतानि**[५]"। इति -

अत्र सत्सङ्गभाष्यम् 'अथ परब्रह्म पुरुषोत्तमस्य किशोरस्वरूपानन्दघनमूर्तेः सर्वाङ्गपेक्षया चरणयोः पावित्र्यं चरण सेवकस्य पूतत्वं दृष्कृतनिस्तारं च श्रुत्या

---

१-स्वा. दर्शन सूत्रम् २९
२-तत्रैव कल्याणीवृत्तिः पृ. २४/२५
३-हरिस्वरूपनिर्णयः पृ. ९-१६
४-तैत्तिरीयोपनिषत् २/१५
५-हरिस्वरूपनिर्णये उद्धृतम्

निवेदयति -चरणमिति-चरणारविन्दयुगलम्, दिव्यमूर्तिपरमात्माप्रकटीभूय यत्र क्वापि ब्रह्माण्डे विततं विन्यस्तं विस्तारितं विहरणे स्पर्शितं, तत्र तत्र सर्वत्र पवित्रम् । निर्लेपं निर्गुणं स्पृष्टवस्तुसंगाऽपराभूतं स्पृष्टवस्तुपवित्रकारकं च मायालोकेषु पृथिव्यादिष्वपि अमायिकभावसम्पादकं दिव्यताधायकं सर्वपावन मेवाधारदोषवर्जितं वर्तते। साङ्गामूर्तिः शाश्वती, सर्वाङ्गानि शाश्वतानि; चरणयुगलं सनातनम् पुराणं, कदाचिदाविर्भूतमिति न, सदैकमानं सदायतनं निर्मितिवर्जित-मित्याह पुराणमिति । अथ भगवानेव पुराणपुरुषः पुरुषोत्तमः सर्वथा पावनः । कथमस्यान्यान्यङ्गानि विहाय चरणयोः पुराणयोः पावनत्वमभिहितम् - इति् चेदित्थम् । मूर्तित्वेन वर्ण्यते तदा मूर्तिः पावनी, मूर्त्यङ्गत्वेन वर्ण्यते तदा तत्र मूर्त्यङ्गपावनम् । पावनं पूजनार्हम् इति [१]।

मनुष्यत्वदिव्यत्वयोः सामञ्जस्यं प्रतिपादयन् श्री गोपालानंद स्वामि शास्त्राण्यपराणि प्रमाणान्युपन्यसति

''**आत्मैवेदमग्रे आसीत् पुरुषविधः**[२]'' इति ।

**यः सर्वज्ञः सर्ववित् यस्यैषमहिमाभुवि दिव्ये ब्रह्मपुरे ह्येष व्योम्नि आत्मा प्रतिष्ठितः**[३]'' इति ।

अथ ''**नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । तमात्मस्थं योऽनुपश्यन्ति धीराः तेषां शान्तिः शाश्वती नेतरेषाम्**[४]'' इति। ब्रह्मवैवर्ते प्रकृतिखण्डे च -

**ददर्श कृष्णं ग्रीष्मस्य कोटिसूर्यसमप्रभम् ।**
**द्विभूजं मुरलीहस्तं किशोरं गोपवेशकम् ॥**
**परमात्मानमीशं च भक्तानुग्रह विग्रहम् ।**
**स्वेच्छामयं परंब्रह्म परिपूर्णतमं विभूम् ॥**
**ब्रह्मविष्णुशिवाद्यैश्च स्तुतं मुनिगणैर्नुतम् ॥**

इति एभिः सर्वैः प्रमाणैश्च दिव्यसाकारविग्रहवत्त्वं परस्य ब्रह्मणः सिद्ध्यति।

---

१-श्रीहरिस्वरूपनिर्णयः पृ.२६-२७
२-बृहदारण्यकोपनिषत् १/४/१
३-मुण्डकोपनिषत् २/२-७
४-कठोपनिषत् २/२/१३

## ६.६ परब्रह्मणो धाम

अक्षर-चिदाकाश-ब्रह्म-ब्रह्मपुर-ब्रह्मलोक '' इत्यादिशब्दैरभिहितं भगवद्धाम श्री स्वामिनारायणीय वचनामृते । गीतायां तु भगवता श्रीकृष्णेन ''**यद् गत्वा न निर्वतन्ते तद्धाम परमं मम्** [१]''। इति परमपदमप्युच्यते। एकरसचैतन्येऽक्षरधामनि सकलजीवातिसुखदः सहजानंदकन्दः परब्रह्म भगवान् श्री स्वामिनारायणः दिव्यतनुः राजत इति नैकेषु तरंगेषु हरिवाक्यसुधासिन्धा वभिहितम् । तद्यथा –

**यस्मिन् तेजसि तद्रूपं भवत्येकरसे सिते ।**
**आत्माब्रह्माऽक्षराद्याभिस्तदाख्याभिः प्रकीर्तितम् ॥**
**यस्तत्र भगवान् साक्षात् स परब्रह्मसंज्ञकः ।**
**आत्मतत्त्वाभिधश्चासौ पुरुषोत्तम उच्यते [२]॥**

**तेजो मयेऽक्षरे धाम्नि तस्मिन् दिव्यतनुं प्रभुम् [३] ।**

अक्षरधाम्नि तेजोमये दिव्याकारो भगवान् राजत इति ।

**ब्रह्मधाम्नि हरिः साक्षादस्ति दिव्यासनस्थितिः ।**
**सेवितोऽनेकमुक्तौघैर्दिव्याऽनेकोपचारकैः [४]॥**

**यो ब्रह्मधाम्नि भगवान् सदाऽऽस्ते दिव्य विग्रहः [५]॥**

**सदा कृष्णोऽस्ति साकारो ब्रह्मधाम्न्यतितेजसि ।**
**योऽन्तर्यामी स सर्वेषां सर्वकारणकारणम् [६]॥**

**विराजतेऽक्षरे धाम्नि स वै राजाधिराजवत् [७]।**

**तेज पुञ्जेऽक्षरे धाम्नि नित्यं कृष्णो विराजते [८] ॥**

इत्थं भगवता श्री स्वामिनारायणेन स्वकीयोपदेशेषु भगवतः दिव्यसाकार विग्रहवत्त्वं तथा तस्य धाम स्वरूपं सम्यक् प्रतिपादितमस्ति। तत्तु श्रुतिस्मृतिसूत्र ग्रन्थाऽविरुद्धमेव ।

---

१-भगवद्गीता १५/६
२-श्रीहरिवाक्यसुधासिन्धुः १४६/३०-३१
३-श्रीहरिवाक्यसुधासिन्धुः १८३/५
४-श्रीहरिवाक्यसुधासिन्धुः १९७/१४
५-श्रीहरिवाक्यसुधासिन्धुः २३०/९
६-श्रीहरिवाक्यसुधासिन्धुः २५५/१४
७-श्रीहरिवाक्यसुधासिन्धुः २५८/४८
८-श्रीहरिवाक्यसुधासिन्धुः २६०/१२

मूर्ताऽमूर्तस्वरूपाक्षरब्रह्मधाम भगवतस्तत्र श्रुतिवचांसि प्रमाणरूपेणोपन्यस्तानि श्रीकृष्णवल्लभाचार्येण ब्रह्मरसायणभाष्ये -

**''यदक्षरं वेदविदो वदन्ति''**
**तदाहुरक्षरं ब्रह्म सर्वकारणकारणम् ।**
**विष्णोर्धाम्नि परं साक्षात्पुरुषस्य महात्मनः ॥''**
**अपहतपाप्मा ह्येष ब्रह्मलोकः ''**
**अस्मिल्लोका निहिता लोकिनश्च तदेतदक्षरं ब्रह्म**
**ब्रह्मज्योतिः सनातनम्**
**यस्य भासा सर्वमिदं विभाति ।**
**विरजो ह्येष ब्रह्मलोक''**
**यद् हि पश्यन्ति मुनयो गुणापाये समाहिताः ।**
**एतदालम्बनं ज्ञात्वा ब्रह्मलोकं महीयते ।**
**यः सेतुरीजानामक्षरं ब्रह्म यत्परम् ।**
**तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ।**
**तेषामयं ब्रह्मलोको येषु सत्यं प्रतिष्ठितम्**
**परमेवाक्षरं प्रतिपद्यते यो ह शुभ्रं**
**येनाक्षरं पुरुषं वेद''**
**दिव्ये ब्रह्मपुरे ह्येष व्योम्नि आत्मा प्रतिष्ठितः''**
**ते ब्रह्मलोकेषु परान्तलोके परामृताः परिमुच्यन्ति सर्वे[१]''** इत्यादयः

**वचनामृतेषु प्रकाशात्मकमूलाक्षरब्रह्मधाम्नः सच्चिदानंद ब्रह्मपुरामृतधाम-परमपदाऽपारब्रह्मचिदाकाशभगवद्धामब्रह्मज्योतिः स्वधामतेजोमय-भगवद्धामाऽक्षरधामनिराकारैकरसचैतन्यचिदाकाश ब्रह्ममहोलपुरुषोत्तमभगवत्तेजः सर्वधामचिदाकाशस्वकीय-प्रकाशरूपधाम कान्तिरूपप्रकाशब्रह्मप्रकाशसच्चिदानंद चिद्धनतेजः सगुणनिर्गुणैश्वर्यतेजः समूहदिव्यसिंहासनभगवद्धामैकरसतेजश्चिदाकाश-तेजोमण्डलब्रह्मज्योतिः समूहकिरणगोलेकेत्यादिनामभिरक्षरधामैव प्रोक्तं सर्वत्र वेदितव्यम्[२]।**

श्रीविशिष्टाद्वैतनये नित्यविभूतेरेव भगवद्धामत्त्वेन वर्णनं क्रियते। तदस्मिन् नयेऽपि वर्णितं श्री स्वामिनारायणवेदान्तसारनाम्नि ग्रन्थे श्रीकृष्णवल्लभाचार्येण निम्नांकित प्रकारेण।

---

१-ब्रह्मरसायण भाष्य खण्ड १ पृ. ५११-५१२

२-ब्रह्मरसायण भाष्य खण्ड १ पृ. ९९

**''दिव्यविभूतिर्नाम सच्चिदानंदात्मकनित्यशुद्धसत्त्वमयो मायाप्रतिद्वन्द्वी अप्राकृतपदार्थविशेषः । यथा संसारे माया त्रिगुणा विभूति घंटादिसर्वपदार्थकारणीभूता, तथा ब्रह्मलोकेऽक्षरधाम्नि नित्य-शुद्धसत्त्वा दिव्य विभूतिर्ब्रह्मलोकस्थ यावाद्दिव्यवस्तविशेषाणामुपादानभूता। शुद्धसत्त्वात्मकविभूतित्त्वंनाम त्रिगुणद्रव्यव्यतिरिक्तत्वे सति सत्त्ववत्त्वम्, निःशेषाऽविद्यानिवृत्तिदेशविजातीयाऽन्यत्वं चेति। सा ब्रह्मलोके सर्वत्र स्वयंप्रकाशा चाऽप्रकाशा चाऽस्ति, किन्तु आत्मतत्त्वात्मक चेतनभिन्नत्वाद् अचेतनेति व्यवह्रियते । सा च परमेश्वरसङ्कल्पात् मुक्तादीनां भोग्यभोगोपकरणभोगस्थानरूपा भवतीति [१]।''**

परब्रह्मणो धाम्नो विषये श्री स्वामिनारायणदर्शने श्री कृष्णवल्लभाचार्य सूत्रयामास-

**''प्रत्यक्षभगवद्वासे धाममुक्तादिसत्त्वम्** [२]**''** ।

तस्यायमाशयो यत् मायातीतदिव्यो यत्र कुत्रापि भगवान् निवसति तस्मिन् निवासस्थल एव दिव्यमूर्तिरक्षरधामापि भवति, एतद्दिव्यचक्षुषः पुरुषा सर्वे दृग्गोचरीकुर्वन्त्येव भगवतो कृपाप्रभावप्राचुर्यात् । लौकिकचक्षुषाः पुरुषाः तु लौकिकरीतिकं भगवत्स्वरूपं पश्यन्ति; तदिदमुभयविधमपि दर्शनसमकालमेव तद्योग्यचक्षुष्मतां जायते । सत्त्वाद् दर्शनं दर्शनेन सिद्धः । सिद्धस्यावलम्बनं आश्रयेण मुक्तिरपि गम्यते । **अत्र वचनामृतम्-यत्र प्रत्यक्षो राजते तत्र परम धामास्ति। सन्तीमे सर्वे नारदसनकादिसमा दिव्याः। इमे च सर्वे सत्सङ्गिनः विदुराक्रूरसुदामावृन्दावनीयगोपसमा दिव्याः सन्ति। इमाश्च हरिभक्तयोषितिः सर्वा गोपिकाद्रौपदीकुन्तीसीतारुक्मिणीलक्ष्मीपार्वतीसमाः सन्ति** [३]। इत्यादि। श्री हरिवाक्यसुधासिन्धौ श्रीहरिणोक्तम् -

**स तु प्रभुर्घनश्यामोऽप्यवदातोऽतितेजसा ।**
**आजानुबाहुयुगलो मनोहरपदद्वयः ॥**
**अतिसौम्यो नराकारः किशोरः करुणानिधिः ।**
**उपविष्टः स्थितः क्वापि चलन् क्वापि स दृश्यते ॥**
**तन्मुखैकदृशो मुक्ताः परितः सन्ति कोटिशः ।**
**पश्यामि तमहं नित्यं प्रत्यक्षं पुरुषोत्तमम् ॥**
**एतद्देशागमात् पूर्वमपश्यममुं सदा ।**
**मातुर्गर्भगतोऽप्येवं ततः प्रागपि चेश्वरम् ॥**

---

१-श्री स्वामिनारायणवेदान्तसार पृ. ३२
२-स्वा. दर्शन सूत्रम्
३-वचनामृतम् ग. प्र. प्र. ६३

**तत्तेजःपुंजमध्यस्थ एवाद्याहं वदामि च ।**
**युष्मानपि च पश्यामि निषण्णांस्तत्र सर्वशः ॥**
**एतद् दुर्गपुराद्यं तु मया किञ्चिन्न दृश्यते ।**
**एतादृशी स्थितिर्मेऽस्तीत्येवं जानित सत्तमाः ॥**
**येन येनाऽवबुध्येत रूपमेतत् परात्मनः ।**
**पुमान्सोऽपि मद्वत् स्यान्नासक्तः क्वापि वस्तुनि ॥**
**तदेव रूपं यूयं पश्यथात्रैव संसदि ।**
**अपि सम्यक् न तज्ज्ञानमस्तीत्यन्यदपीक्ष्यते ॥**
**यदा ज्ञास्यथ तद्रूपं यथावस्थितमञ्जसा ।**
**तदा सुजेया विषयाः कामाद्याश्चान्तरारयः ॥**
**यस्मिंस्तेजसितद्रूपं भवत्येक रसे सिते ।**
**तदक्षराऽत्मब्रह्मादिनामभिर्सप्रकीर्त्यते ॥**
**यस्तत्र भगवान् साक्षात् स परब्रह्म संज्ञकः ।**
**आत्मतत्त्वाभिधश्चासौ पुरुषोत्तम उच्यते [१]॥**

अनेनापि सुधासिन्धोः वचनप्रमाणेन गृहीतनरवपुषः परब्रह्मणः निवासस्थानस्यापि सिद्धयत्यक्षरधामत्वमिति मे मनीषा । अथ चात्र सूत्रम्-

''**धामस्यास्यैवात्र विविधदर्शनात्** [२]''

इत्येनन सूत्रेण द्वारा प्रतिपादितमपि भवति यत्

''**तदैक्षत बहुस्यां प्रजायेय** [३]'' ।
''**स्वयमात्मानमकुरुत** [४]''।
''**अजायमानो बहुधा विजायते** [५]'' ।

इत्यादिकैः वाक्यैः परब्रह्मण एवाक्षरब्रह्मलोकविभवेत्यादि वर्णनात् । सर्वनियामकस्यैव बहुभवनत्वानेकाविर्भावत्वादि वर्णनात् । द्वारस्य चिदुपयोगात्रं तु सर्वत्रेति । नैकान्ततो द्वारमावश्यकं परमात्मनोऽवतरणे धामस्थाक्षरातीत। वचनामृतेऽप्युक्तम्-**अक्षरधाम्नि भगवत्स्वरूपमनन्तैश्वर्य युक्तं वर्तते, तदेव प्रत्यक्षमनुष्यदिव्यवेषस्वरूपं बोध्यम्** [६]'' इति ।

श्रीमद्वेदान्तदेशिकस्तु न्यायसिद्धाञ्जने नामके ग्रन्थे निम्नांकित प्रकारेण परब्रह्मणो धामनो वर्णनमकार्षीत् ''**त्रिगुणद्रव्यव्यतिरिक्तत्त्वे सति सत्त्ववत्त्वम्, स्वयंप्रकाशत्वे सति सत्त्ववत्त्वम्, तमो रहितत्त्वे सति सत्त्वत्वम्, निःशेषा-**

१-श्रीहरिवाक्यसुधासिन्धुः पृ.१८१ श्लोक २१-३१
२-स्वा. दर्शन सूत्रम् ११/९१
३-छांदोग्योपनिषत् ६/२/३
४-उपनिषद् वचनम्
५-तैत्तिरीयारण्यकम् ३/१३/३
६-वचनामृतम् १३३ (पञ्चाला-७)

**विद्यानिवृत्तिदेशविजातीयान्यत्वम्** [१]" इत्यादिलक्षणम् । आदित्यवर्ण... इत्यादिभिस्तत् सिद्धिः । इति तदानन्त्यं च वर्णयन्नाह-सा च विभूतिः केनचित् प्रदेशेनानन्ता, केनचित्ववच्छिन्ना । आनन्त्यतमः परत्वयोः श्रुतयोरवर्जनीयत्वात् । आनन्त्यमात्र साम्येऽप्यनन्तत्रिगुणादपीयमधिकतरान्यूनाधिकभाववचनात् । अनन्तेष्वेव मिथस्तारतम्यस्य सिद्धत्वात् । देशोऽपि निदर्शयामः । आदित्वादूर्ध्वमपि गगनदेशोऽनन्तः भूमण्डलादनन्तरः पातालादनन्तरा इति । पादत्रिपादव्यपदेशाच्च तद्विषयोऽपि तद्देशतारतम्यस्यानुग्राहको भवति । अयं च विभागो न समचतुर्भागाभिप्रायः **'वृद्धयर्थः पाद्वत्** [२]'-इत्युक्तत्वात् ।

"**विहरति योऽक्षरेऽक्षरपदाक्षरमुक्तपतिः,**

**पुरुषविधो विधिं विधिहरीश्वरमुख्यबुधाः** [३]। इत्यादिना परब्रह्मणो धाम्नोवर्णनं श्रीयोगानंदमुनिः करोति स्वकीये भजनाष्टके । अत्रापि परस्य ब्रह्मणः नैकमुक्तपरिसेवितस्याक्षरधामनिवासितत्वमेव प्रस्फूटम् ।

## ६.७ परब्रह्मणो जगत् कारणत्वम्

महर्षिः बादरायणः "**जन्माद्यस्य यतः** [४]" इति सूत्रे परस्य ब्रह्मणो जगत्कारणत्वमाह । श्रुतिरपि तैत्तिरीयोपनिषद् वक्ति

"**यतो वा इमानि भूतानि जातानि** [५]"। इति

परंब्रह्मैव सर्वस्य जगतः कारणम् । तथाहि-

"**सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्** [६]"।

"**ब्रह्म वा इदमग्र एवाग्र आसीत्** [७]" ।

अत्र ब्रह्मशब्दः परब्रह्मपरः । "**आत्मा वा इदमेक एव आसीत्** [८]"इत्यादिषु कारणवादिषु वाक्येषु सामान्यशब्देन कारत्वं निदर्श्य "**एको ह वै नारायण आसीत्** [९]" इति श्रुतिः नारायणस्यैव कारणत्वं प्रतिपादयति। अयमाशयो यत् सदैवेत्यादौ कारणत्वेनोक्त : सच्छब्दवाच्यार्थः प्रकृतिर्वा जीवो वा परंब्रह्म वा भवितुमर्हति, सच्छब्दस्य सत्तावत्तो वाचकत्वात् - तथैव" ब्रह्मैवेदमग्र आसीदिति श्रुतौ कारणवाचको ब्रह्मशब्द उपर्युक्तप्रकारेणैव जीव प्रकृतिपरब्रह्मणां बोधको भवितुमर्हति । परश्चायं नारायण शब्दः कारणवाचकः

---

१-न्यायसिद्धाञ्जनम् पृ. ५०४-५०६
२-पाणिनीय वार्तिकम्
३-योगानंदमुनि कृतम् भजनाष्टकम्
४-ब्रह्मसूत्रम् १/१/२
५-तैत्तिरीयोपनिषद् भृगुवल्ली १
६-छांदोग्योपनिषत् ६/२/१
७-बृहदाराण्यकोपनिषत् १/४/१
८-ऐतरैयोपनिषत् १/१
९-महोपनिषत् १/१

संज्ञायामेव व्युत्पद्यते। संज्ञायां स्वार्थे अयनशब्दगतस्य नकारस्य णकारो भवितुमर्हति। **''पूर्वपदात्संज्ञायामगः[१]''** इति सूत्रेण। स च नारायण एव परंब्रह्म। नराणामयनं नारायणः इति हि नारायणशब्दस्य विग्रहः। नारशब्दस्य नित्यानां जीवेश्वरमायाब्रह्मणां बोधकत्वम्। तेषां समेषां आश्रयत्वान्नारायणशब्दः परंब्रह्मणो वाचकः। तस्यैवावस्थाविशेषाः बोधयन्ति सदात्मब्रह्मादिकाः कारणवाचकाः शब्दाः।

पराशरभट्टाचार्या अप्याहुः **''नराणांनित्यानामयनमिति नारायण पदम्[२]''**। श्रीमद् भागवत्महापुराणेऽप्युक्तं

**''जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्[३]''**

इति श्लोकेनाभिहितम्। श्री वत्साङ्ककमिश्रा अपीममेवार्थं प्रतिपादयन्तः प्राहुः-

**यन्मूलकारणमबुध्यतसृष्टिवाक्यैः,**
**ब्रह्मेति वा सदिति वाऽऽत्मगिराऽथवा तत्।**
**नारायणस्त्विति महोपनिषद् ब्रवीति,**
**सौबालिकीप्रभृतयोऽप्यनुजग्मुरेनाम्[४]।**

यत्तु नैयायिकाः वैशेषिकाः जैनाश्च परमाणोरेव जगत्कारणत्वमाहुः, तन्नोपपद्यते परमाणूनां सद्भावे प्रमाणसदभावत्। नहि सर्वथा निर्मार्गः परमाणुः केनापि प्रत्यक्षीयते। किञ्च यदि परमाणुः सर्वथानिमार्ग एव स्यात् तदा सहस्राणामपि परमाणूनां एकत्र सद्भावेऽपि परिमाणस्य वृद्धिः न स्यात्। परन्तु परमाणुनां एकत्रीभावे जातेऽपि परिमाणस्य द्वयणुकत्रसरेणुरूपेण च वृद्धिं स्वीकुर्वन्त्येव। अत एवैतेषां दार्शनिकानां मते परमाणौ 'प्रत्यक्षानुमानयोरसद्भाव एव। परमाणौ श्रुतेरपि प्रमाणं नोपलभ्यते अत एव परमाणूनां कारणत्वकल्पना श्रुतिप्रमाणप्रतिकूलत्वादेव प्राहता भवति।

यत्तु सांख्याः जडायाः प्रकृतेः कारणत्वं प्रतिपादयन्ति तदपि न, अचेतनायास्तस्या ईश्वराधिष्ठानाभावे परिमाणासम्भवात्। सृष्टिसंहार व्यवस्थायाश्चाऽसम्भवात्। मृदः मृदात्मकस्य घटस्य परिणामो भवति तथैव सत्त्वरजस्तमोमयस्य जगतः गुणत्रयस्य साम्यावस्थारूपायाः प्रकृतेरेव परिणामो भवतीति। यथा वा जडं पयः चेतनाधिष्ठितमेव दधिभावेन परिणमते तथैव चेनाधिष्ठिताया एव जडायाः प्रकृतेः जगद्रूपेण परिणामो भवति। वारिदविमुक्तस्यैवैकस्य जलस्य ईक्षु -निम्ब-जम्बीर-कपित्थरूपाश्रयभेदान्मधुरकट्वम्लकषायादिविविधरूपेण

---

१-पाणिनीयव्याकरण सूत्रम् ८/४/३
२- अष्टश्लोकी -३
३- श्रीमद् भागवतम् १/१/१
४-वैकुण्ठस्तवः २५

परिणामो भवति। यथा गुणत्रयसाम्यरूपायाः प्रकृतेर्विचित्रसर्गरूपेणविविधाकारः परिणामः विविधादृष्टवासिताऽन्तःकरण–युक्तशरीरभेदरूपाश्रयभेदादेव भवति, अत एव प्रकृतिरेव जगतः स्वतन्त्रं कारणम्।

अत्र प्रधानव्यतिरिक्तकारणवादिनो प्राहुः–प्रधानं जगतः कारणं भवितुं नार्हति। अचेतनत्वात्। सृष्टेश्च ईक्षणपूर्वकत्वश्रवणात्। अस्यैवार्थस्य प्रतिपादनं कुर्वता बादरायणेनाभिहितम्

**''ईक्षतेर्नाशब्दम्[१]''**

अत्र ''अशब्द'' शब्दः प्रधानपरः। नास्ति शब्दः प्रमाणं यस्मिन् तत् अशब्दम्। जडायाः प्रकृतेः जगत्कारणत्वे किमपि शब्दप्रमाणं नास्तीत्यर्थ :। अत्र कारणमप्याह–ईक्षतेरिति। ईक्षणम्–संकल्पात्मकम्। संकल्पपूर्विका हि कारणवादिनीषु श्रुतिषु जगतः सृष्टि श्रुयते। संकल्पश्चचेतनस्यैव धर्मः। संकल्पः जडस्य धर्मो भवितुं नार्हति। यतः प्रकृतिः जडा संकल्पकर्तुं न हि क्षमा, अत एव सा जगतः कारणं भवितुं नार्हति।

**''तदैक्षत् बहुस्यां प्रजायेय[२]''**

इति श्रुतिः संकल्पपूर्विकायां सृष्टौ प्रमाणम्। अत एव प्रकृतेर्जगत्कारणत्वं प्रतिषिद्धम्। अत एवास्यैव ब्रह्मणः जगत्कारणत्वं स्वीकर्तव्यम्।

अथ स्यान्न चेतनगतं मुख्यमीक्षणमिहोच्यते। अपि तु प्रधानगतं गौणमीक्षणम्

**''तत्तेज ऐक्षत ता आप ऐक्षन्त[३]''**

इति गौणेक्षणसाहचर्यात्। भवति चाचेतनेष्वपि चेतनधर्मोपचारः, यथा ''वृष्टिप्रतीक्षाः शालयः'' वर्षेण बीजं प्रति संजहर्ष'' इति। अतो गौणमीक्षणमिति। एवं प्राप्तेऽभिधत्ते सूत्रकारो महर्षिः बादरायणः

**''गौणश्चेन्नात्मशब्दात्[४]''**

इति। अयमप्यभिप्रायो यत्–यदुक्तं गौणेक्षणसाहचर्यात् सतोऽपीक्षणव्यपदेशः सर्गनियतपूर्वास्थाभिप्रायः। गौण इति तन्न

**''एतदात्म्यमिदं सर्वं स आत्मा[५]''**

इति श्रुत्या चेतनाचेतनात्मकं प्रपञ्चमुद्दिश्य। सतः आत्मा शब्देन व्यपदेशोऽयमचेतने प्रधाने नहि युज्यते। अत एव पृथिव्यप्तेजसामप्यात्मा परमात्मैव। फलतः ''स आत्मा' इति श्रुतावात्मशब्दस्य गौणत्वशङ्का नहि

---

१-ब्रह्मसूत्रम् १/१/५
२-छांदोग्योपनिषत् ६/२/३
३-छांदोग्योपनिषत् ६/६/८
४-ब्रह्मसूत्रम् १/१/६
५-छांदोग्योपनिषत् ६/८/७

कार्या। अग्रेऽपि प्रकृतेः कारणत्वं निराकुर्वाणेन महर्षिणा बादरायणेनाभिहितम्

**"तन्निष्ठस्य मोक्षोपदेशात्[१]"** इति

अयमर्थो यन्मुमुक्षोः श्वेतकेतो "तत्त्वमसि" इति सदात्मकत्वानुसन्धान-मुपदिश्य पिता उद्दालकः" तन्निष्ठस्य"

**"तस्य तावदेव चिरं यावन्न विमोक्ष्य अथ सम्पत्स्ये[२]"**। इति श्रुत्या मोक्षमुपदिशति।

यदि चाचेतनं प्रधानमेव कारणत्वेनोपदिशेत् तर्हि तन्निष्ठमोक्षावाप्तिं नोपदिशेत् श्रुतिः।

**"यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्यभवतीति[३]।"** इति श्रुत्युक्ततत्क्रतुन्यायेन चेतनसम्पत्तिरेव स्यात्। सांख्या अपि प्रकृतिनिष्ठस्य मोक्षं नहि स्वीकुर्वन्ति, अत एवापि प्रधानं सच्छब्देन नोपदिश्यत इति सिद्धम्।

किञ्च सांख्या अपि प्रकृतिहेयत्वं स्वीकुर्वन्ति, अत एवापि प्रकृति सच्छब्दवाच्या न हि भवितुमर्हतीति प्राह-सूत्रकारः

**"हेयत्वावचनाच्च[४]"** इति।

इत्ययमर्थः सिद्धो यत्-प्रकृतिः जगत्कारणं भवितुं नार्हति।

केचन जनाः ब्रह्मण एव जगत्कारणत्वं स्वीकुर्वन्ति, केचन च पशुपतिमेव। परञ्चेदमुभयमपि मतं सामीचीन्यं नो बिभ्रतः। ब्रह्मापशुपत्यो ईश्वरान्तर्गतत्वात्, तस्मादेव तेषां कर्मपरतन्त्रत्वं भवति। स्मरन्त्यपि चतुर्मुखस्य ब्रह्मणो वेदापहारादिजन्यं दुःखितत्त्वं पशुपतेश्च ब्रह्महत्यादिजन्यं दुःखभोक्तृत्त्वादिकम्। श्रुतिश्च जगत्कर्तुः सर्वज्ञत्वं, सत्यसंकल्पत्वं, अपहतपाप्मत्वावादिकं वक्ति। अत एव चतुर्मुखपशुपत्योः जगत्कारणत्वं प्रतिहतं भवति। यस्मात् कारणान्न वा प्रधानं न वा कश्चनापि जीवः जगत् कारणं भवितुमर्हति तस्मादेव कारणात्परंब्रह्मैव जगतः कारणं सिद्धयति।

अस्य परब्रह्मणो जगत्कारणत्वमविद्याकर्मपरनियोगादिहेतुकं नहि भवति, अपि तु स्वेच्छया परंब्रह्म जगत्करोति।

अयमर्थो यत्-लोके दृश्यमानमुत्पादकभावरूपमागन्तुकं कारणत्वम-विद्याकर्मनिबन्धन सर्वजीवधारणम्। तत्रैव वैषयिक-सुखप्राबल्ये-नाज्ञानेन च भवति। मनुष्याणामुत्पादकत्त्वं कर्मप्रधानम्, तेषां शास्त्रवश्यत्वात्। तिर्यगादीनामुत्पादकमज्ञानमेव भवति, चतुर्मुखस्योत्पादकत्वं परमात्मप्रेरितत्वादेव भवति। तथा चोक्तमपि-

---

१-ब्रह्मसूत्रम् १/१/७
२-छांदोग्योपनिषत् ६/१४/२
३-छांदोग्योपनिषत् ६/१४/१
४-ब्रह्मसूत्रम् १/१/८

**प्राजापत्यं त्वयाकर्मपूर्वं मयि निवेशितम् ।**
**एतौ द्वौ विबुधश्रेष्ठौ प्रसादक्रोधजौ स्मृतौ ॥**
**तदादेशितपन्थानौ सृष्टिसंहारकारकौ** [१]।

परमात्मा न त्वज्ञानेन, न वा कर्मणा प्रेरितः, न वा केनचिदन्येन नियुक्तः सृष्टिं करोति, अपि तु सः स्वेच्छयैव सृष्टिं करोति । यस्मात्कारणात् परमात्मा स्वसंकल्पमात्रेणैव स्वेच्छयैव जगतः सृष्टिं करोति, तस्मादेव कारणात् जगतोऽस्य सृष्टिकरणे परमात्मनो कश्चनाप्यायासो न हि भवति । अत एव पूर्वापरश्रुतिस्मृति वचनां पर्यालोचनं कृत्वाह वेदान्तदेशिकः ।

**अस्यैवाचिन्त्यशक्तेरखिलजनयितुः स्यादुपादानभावः,**
**सूक्ष्माव्यक्तादिदेहः परिणमति यतोऽनेकधा स्थूलवृत्त्या ।**
**निष्कृष्टेऽस्मिन् शरीरिण्यमलगुणगणालङ्कृतानन्दरूपे,**
**संपद्यन्ते समस्ताः समुचितगतयो निर्विकारादिवादाः** [२]॥

इत्थं समग्रतया कृतेन विचारेण परब्रह्मण जगत्कारणत्वं सिद्ध्यति; न त्वन्यस्य कस्यचनेति भावः । तदग्रे स्फुटं भविष्यति ।

## ६.८ परब्रह्मणोऽभिन्ननिमित्तोपादानकारणतासमर्थनम्

उपर्ययमर्थः संसाधितो यत् परब्रह्मैव जगतः कारणं वर्तते । अस्मिन् शीर्षकेऽयमर्थः साध्यते यत्-परंब्रह्म जगतोऽभिन्ननिमित्तोपादानकारणं विद्यते । लोके दृश्यते सर्वेषां कार्याणामुपादानकारणं, निमित्तकारणञ्च भिन्नं भवति । अत एव तेनैव प्रकारेण कस्यचनैषा शंका भवितुमर्हति यज्जगत उपादानकारणं किम् ? निमित्तकारणं किमुतोभयप्रकारकं कारणमेकमेव ब्रह्मेति ? ।

अत्र नैयायिकाः वदन्ति यज्जगतः निमित्तमेव कारणं परंब्रह्म भवितुमर्हति न तूपादानमपि । यदुपादानकारण तु तदेव भवति यत् कार्यरूपेण परिणतं भवति । यथा घटस्योपादानकारणं मृत्पिण्डमेव घटरूपेण परिणतं भवति । यदि परंब्रह्मापि जगद्रूपेण परिणतं भवेत्तर्हि तस्य तु निमित्तकारणतैव न्यायोचिता । यतः यो हि यस्य कार्यस्य निमित्तकारणं भवति सः तस्य कार्यस्योपादानोप - करणसम्प्रदानप्रयोजनानां ज्ञाता भवति । यथा कुलालः घटस्योपादानोप - करणसम्प्रदानप्रयोजनानां ज्ञाता भवति ।

परंब्रह्म तु सर्वज्ञं **''यः सर्वज्ञः सर्ववित्** [३]**'' परास्य शक्तिर्विविधैव श्रुयते । स्वाभाविकी ज्ञानबलक्रिया च**'' इति् श्रुतिः । तस्य सर्वज्ञत्वं

१-तत्त्वमुक्तकलापः व्याख्यायामुद्धृतः
२-तत्त्वमुक्तकलापः ३/२५
३- मुण्डकोपनिषत् २/२/७

सर्वशक्तिमत्त्वं च प्रतिपादयति । अत एव जगतो निमित्तकारणमेव परंब्रह्म न तूपादानकारणमपि ।

अत्रोच्यते-परंब्रह्मैव जगतोऽभिन्ननिमित्तोपादानकारणं भवति तस्योभयथा कारणत्वं प्रतिपादयन्नाह श्रीनिवासाचार्यः यत्-अयमीश्वरः सूक्ष्मचिदचिद्विशिष्ट वेषेण जगदुपादानकारणो भवति, संकल्पविशिष्टवेषेण निमित्तकारणं भवति; कालाद्यन्तर्यामिवेषेण सहकारिकारणं च । कार्य रूपेण विकारयोग्यं वस्तू पादानकारणम् । कार्यतया परिणामयितृ निमित्त कारणम्, कार्योत्पत्त्युपकारं वस्तु सहकारि । यद्वा उत्तरोत्तरावस्थाविशिष्ट स्वरूपापेक्षया तदनुगुणनियतपूर्व भाव्यवस्थाविशिष्टं यत्तदुपादानम् । यथा घटत्वावस्था विशिष्टमृद्द्रव्यापेक्षया पिण्डत्वावस्थाविशिष्टं तदेव द्रव्यम् । परिणामौन्मुखायातिरिक्ताकारेणापेक्षितं कारणं निमित्तकारणम् । पक्षेऽस्मिन् सहकारिकारणस्यान्तर्भावो निमित्तकारणे । एवं त्रिविध कारणपक्षे द्विविधकारणपक्षे च कारणलक्षणलक्षितत्त्वादखिल कारणत्वं भगवतो नारायणस्यैव सम्भवति [1]। इति ।

अत्रेश्वरशब्दो हि परब्रह्मपरः । सकलस्य जगतः स्वामी भगवान् नारायण एव जगत्कारणरूपं भवतीति विस्तरेण प्रदिपादनं कुर्वता श्रीनिवासाचार्येण यतीन्द्रमतदीपिकायामग्रे लिख्यते -''ननुं कथं नारायणे कारणत्वपर्यवसानमिति चेदुच्येत्-न्यायसहकृतवेदान्तवाक्यविचारेणैव पर्यवस्यति तद्यथा-आदौ तावन्नोपपद्यते प्रकृतेर्जगत्कारणत्वम् । ईक्षितृत्वाद्यभावात् । छान्दोग्ये तावत् सदाकाशप्राणशब्दवाच्यानां जगत्कारणत्वं प्रतीयते । बाजसनेयके ब्रह्मशब्द-वाच्यस्य जगत्कारणत्वं प्रतीयते । सर्वशाखाप्रत्ययन्यायेन कारणवाक्यानामेक-विषयत्वे प्रतिपादयितव्ये छागपशुन्यायेन सामान्यवाचकानां सदादीनां विशेषे ब्रह्मणि पर्यवसानम् । एवमुक्तन्यायेन ब्रह्मशब्दस्य तैत्तिरीयोक्तात्मशब्दवाच्ये पर्यवसाने आत्मशब्दवाच्यः क इत्याकांक्षायां श्रुतिप्रसिद्धो

**'' इन्द्रो वा, तथा प्रसिद्धोऽग्निर्वा, उपास्यत्वेन प्रसिद्धस्सूर्यो वा, कारणत्वेनोक्तः सोमो वा, अभिष्टप्रदत्वेनोक्तो कुबेरो वा । यमो वा वरुणो वेति संशये-**

एतेषां कर्मवश्यत्वपरिछिन्नैश्वर्यवत्त्वंसंहार्यत्वश्रवणान्नैते जगत्कारणभूता।''

किन्तु श्वेताश्वतरे शिवस्य कारणत्त्वं भासते । एवमथर्वशिखायां शम्भुशब्द-वाच्यस्य ध्येयत्वं कारणत्वं च भासते । तथैवाथर्वशिरसि रुद्रशब्दवाच्यस्य सर्वात्मकत्वमुच्यते । तैत्तिरीये हिरण्यगर्भस्य कारणत्वं प्रतीयते । अत्रापि सामान्य-विशेषन्यायेन शिवशम्भुरुद्रशब्दानां हिरण्यगर्भशब्दवाच्ये विशेषं पर्यवसानं युज्यते ।

---

१-यतीन्द्रमतदीपिका पृ. २१८-२१९

शिवशब्दस्य "शिवमस्तु सर्वजगतां,"शिवास्ते सन्तु पन्थानः, इत्यादिभिर्मङ्गल-वाचित्वम्, रुद्रस्याग्निवाचकत्वम्। एवं महेश्वरशम्भ्वादिसामान्यशब्दा अवयव-शक्त्या चतुर्मुखे पर्यवस्यन्ति। कारणवाचिशिवादिशब्दानां मुख्यवृत्त्या रुद्रपरत्वं किं स्यादिति न शङ्कनीयं, रुद्रस्य चतुर्मुखादुत्पत्तिः श्रवणात्। अनपहतपाप्मत्व-श्रवणाच्च न रुद्रस्य कारणत्वम्। अतो हिरण्यगर्भप्रजापतिस्वयम्भवादिशब्दवाच्ये चतुर्मुखे शिवशब्दाः पर्यवस्यन्ति। एवं महोपनिषन्नारायणोपनिषत् सुबालोपनिषत् मैत्रायणीय पुरुषसूक्तनारायणानुवागन्तर्यामिब्राह्मणादिषु नारायणस्यैव परमकारण त्वसर्वशब्दवाच्यत्वमोक्षप्रदत्त्व जगच्छरीरकत्वादिप्रतिपादनात्। स्वयम्भू हिरण्यगर्भप्रजापतिशब्दानां नारायणे पर्यवसानं युक्तमिति नारायण एवाखिल जगत्कारणं सर्वविद्यावेद्यञ्च [१]। इति।

"**सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्** [२]"इति श्रुतेरालोके सच्छब्दवाच्यस्य परस्य ब्रह्मणो जगत्प्रति अभिन्निमित्तोपादानकारणतां प्रतिपादयन् श्रीरामानुजाचार्योऽपि वेदार्थसंग्रहे प्राह-**अत्रेति जगन्निर्दिष्टम्, अग्रे इति च सृष्टेः पूर्वकालः। तस्मिन् काले जगतः सदात्मकतां "सदेव" इति प्रतिपाद्य तत्सृष्टिकालेऽपि "अविशिष्टम्" इति कृत्वा एकमेवेति सदायत्तस्य जगतः तदानीं अविभक्तनामरूपतां प्रतिपाद्य, तत् प्रतिपादनेनैव सतो जगदुपादानत्त्वं प्रतिपादितमितिस्वव्यतिरिक्तनिमित्तकारणं अद्वितीयपदेन प्रतिषिद्धमिति** [३]। "**तमादेशमप्राक्ष्य येनाश्रुतं श्रुतं भवति** [४]" इत्यादावेव प्रशासितैव जगदुपादान मिति दृष्टिनिहितमिदानीमभिव्यक्तम्।

एतदेवोपपादयति स्वयमेव जगदुपादनं जगन्निमितं च "सत्" **तदैक्षत बहुस्यां प्रजायेय** [५]" इति। तदेव सच्छब्दवाच्यं परंब्रह्म सर्वत्र सर्वशक्तिसत्य-सङ्कल्पमवाप्तसमस्तकाममपि लीलार्थं विचित्रानन्तचिदचिन्मिश्रजगद्रूपेण अहमेव बहुस्यां, तदर्थं प्रजायेयेति स्वयमेव सङ्कल्प्य स्वांशैकदेशादेव वियदादिभूतानि सृष्ट्वा पुनरपि सैव सच्छब्दितापरा देवता एवमैक्षत् "**हन्ताऽहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी** [६]"ति। अनेन जीवात्मना "इति जीवस्य ब्रह्मात्मक जीवानुप्रवेशादेव कृत्स्नस्याचिद् वस्तुनः पदार्थत्वम्। एवम्भूतस्यैवाचिद्वस्तुनः नामरूपभाक्त्वमिति च दर्शयति" इति।

अथ यदि कश्चनात्र शंकेत-कस्मात् कारणात् घटादिरूपस्य कार्यवर्गस्य निमित्तकारणमुपादानकारणं च लोके पृथक् पृथक् भवति। कथं नह्येकमेव

---

१-यतीन्द्रमतदीपिका पृ. २१८-२१९
२-छांदोग्योपनिषत् ६/२/१
३-वेदार्थसंग्रह पृ. १४
४-छांदोग्योपनिषत् ६/१/३
५-छांदोग्योपनिषत् ६/२/३
६-छांदोग्योपनिषत् ६/३/२

वस्त्वभिन्ननिमित्तोपादानमुभयमपि भवतीति चेदुच्यते घटस्य कारणभूते कुलाले तादृश्याः शक्तेरभावोऽस्ति यया सः घटरूपेण परिणमेत् मृत्पिण्डेऽपि अधिष्ठा-तृत्वस्याभावोऽस्ति। य उपादानं कार्यरूपेण परिणमयति स एव निमित्तकारणं भवति। अत एव लौकीकानां समेषां कार्याणामुपादाननिमित्तकारणे भिन्ने एव भवतः। किन्तु जगतः कारणं परंब्रह्म तु सर्वज्ञं सर्वशक्ती च वर्तते। अत एव तदेव स्वकीयेनैकविशेषणांशेन जगद्रूपेण परिणतं भवति, स्वयञ्च तस्य कार्यवर्गस्याधिष्ठाताऽपि भवति, अत एव युज्यत एव परस्य ब्रह्मणोऽभिन्ननिमित्तोपादानकारणतेति। तथा चाह भगवान् बादरायणः

**"प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्[१]"**

इति सूत्रेण परस्य ब्रह्मणो जगत्प्रत्युपादानकारणत्वं सिद्ध्येत। अत्र प्रकृतिशब्द उपादानकारणपरः।

**सूत्रस्यास्य प्रदीपे गोपालानंदस्वामी लिखति-**

ननु चेतनाधिष्ठितं स्वतन्त्रं प्रधानं जगतो नोपादानमपि तुं परब्रह्मणाधिष्ठितमेव तु तत्। निमित्तमात्रं परंब्रह्मेत्यत्राह प्रकृत्तिश्चेति- जगतः प्रकृतिश्च -उपादानं ब्रह्मैव प्रतिज्ञादृष्टान्तानुरोधात्। "स्तब्धोस्युत तमादेशमप्राक्ष्यः येनाश्रुतं श्रुतं भवत्यमतं मतम्" इति या एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा यश्च यथा सौम्येनैकेन मृतपिण्डेन सर्वं मृण्मयं विज्ञातं स्यादिति दृष्टान्तः तयोरनुपरोधात्। अन्यथा तयोरुपरोधः स्यात् सर्वस्यास्य चेतनाचेतनप्रपञ्चस्य मृत्पिण्डविज्ञानेन मृण्मयस्यैव यद्विज्ञानेन विज्ञातता तेन हि तदुपादानेन भाव्यम्। स्वभावतः स्वरूपतोऽत्यन्त विलक्षणं चिदचिदीश्वरतत्त्वत्रयमभ्युपगच्छतामयमुपादानोपादेयभावः कथं घटत इति तु वेदान्तहार्दमजानतां चोद्यम्। मिथः स्वरूपस्वभाववैलक्षण्येऽपि विशिष्टं तत्त्वमेकमेव। यदिदं चिदचिदुभयं न दण्डकुण्डलादिवत् स्वतन्त्रमपि तु जाति गुणवत् परमात्मन अपृथक्सिद्धप्रकारभूतम्। अन्तर्यामिब्राह्मणोक्त शरीरशरीरी भावेन तस्य तथात्वं व्यक्तम्। तथा च परंब्रह्मैव स्वेतरचिदचिद्वस्तु विशिष्टं स्वतनुभूतचेतनाचेतनस्थौल्यसौक्ष्म्याभ्यां कार्यकारणभावौपयिकम वस्था भेदं प्राप्नोतीति, एकमेव परंब्रह्म बहुधा भवतीति नेह दुर्घटं किमपि[२]। इति।

किञ्च **"अभिध्योपदेशाच्च[३]"** इति

सूत्रेण महर्षिर्बादरायणः परब्रह्मण एव जगन्निमित्तत्वमपि साधयामास। सूत्रस्यास्य भाष्ये मुक्तानंदस्वामी लिखति- **अभिध्या-संङ्कल्पः। तस्योपदेशात्। "सोऽकामयत-बहुस्यां प्रजायेय** 'इति **"तदैक्षत बहुस्यां प्रजायेय** "इति

१-ब्रह्मसूत्रम् १/४/२३
२-तत्रैव प्रदिपवृत्तौ गोपालानंद स्वामी
३-ब्रह्मसूत्रम् १/४/२४

**स्वस्यैव बहुभवनसंकल्पश्रुतेः ब्रह्मैव निमित्तमुपादानं च**[१] इति।
परब्रह्मणोऽभिन्ननिमित्तोपादानकारणतां प्रतिपादनाय महर्षिर्निम्नांकितं सूत्रं निर्ममे।

''**साक्षात्चोभयाम्नानात्**[२]'' इति।

**सूत्रस्यास्य भाष्यं निम्नांकितप्रकारेण चकार मुक्तानंदस्वामी**
किञ्च निमित्तकारणत्वमुपादानकारणत्वञ्च साक्षात् कण्ठरवेणाम्नायते।

**''किं स्विद् वनं क उ स वृक्ष आसीद्यतो द्यावापृथिवी निष्ठतक्षुः।**
**मनीषिणो मनसा पृच्छते दुतद्यदतिष्ठद, भुवनानि धारयन्।**
**ब्रह्मवनं ब्रह्म स वृक्ष आसीद्यतो द्यावापृथिवी निष्टतक्षुः।**
**मनीषिणो मनसा विब्रवीमि वो ब्रह्माध्यतिष्ठद् भुवनानि धारयन्**[३]॥

उभाभ्यामाभ्यां प्रश्नोत्तराभ्यां वनवृक्षदृष्टान्तमुखेनोपादानत्वादि ब्रह्मण एवेति गम्यते। तत्र प्रश्ने रथकारो वनाद् वृक्षमादाय वास्यादिकमधिष्ठाय रथादिकमिव द्यावापृथिव्यादि सृजन्नयं सर्वेश्वरः कस्मात् कारणात् वनस्थानीयात् प्रदेशाद् वृक्षस्थानीयं किमु कारणमधिष्ठाय द्यावापृथिव्यादिकमिदं निष्टतक्षेत उपादानौपकरणादिकं पृष्टम्। तत्रोत्तरं ब्रह्मैवोपादानमधिकरणमुपकरणं कर्ता चेति अत एव साक्षात् श्रुतिरेव परब्रह्मणः जगत्प्रत्यभिन्ननिमित्तोपादानकारणतामभिधत्ते[४]।

''किञ्च-**तदात्मानं स्वयमकुरुत**[५]'' इति श्रुतिर्वक्ति यत्र परंब्रह्म स्वयं जगद्रूपेण परिणतं भवति तस्मादपि तस्याभिन्ननिमित्तोपादानकारणता सिद्धा। इममेवार्थं ब्रह्मसूत्रकारः

''**आत्माकृते**[६]'' इति सूत्रेणाह।

''**परिणामात्**[७]'' इति

सूत्रेण द्वारा महर्षिर्बादरायणः सदृष्टान्तं ब्रह्मणोऽभिन्ननिमित्तोपादानकारणतां प्रत्यपीपदत्। **अस्य सूत्रस्य प्रदीपे श्रीगोपालानंदस्वाम्यपि लिलेख**-

सकलचेतनाचेतनशरीरकं परंब्रह्मैव प्रलयावस्थायां नामरूपविभागानर्ह सूक्ष्मचेतनाचेतनशरीरकं सत् ''बहुस्याम्'' इति संकल्प्य नामरूपविभागार्हस्थूलचेतनाचेतनशरीरतया परिणमति। यथोर्णनाभिः सृजते गृह्णते च[८]''इति।

अस्य परब्रह्मणो निमित्तोपादानकारणतायाः जगत्प्रतिप्रतिपादनस्योपसंहार कुर्वता महर्षिणा बादरायणेनाभिहितम्

---

१-ब्रह्मसूत्रम् १/४/२४ प्रदीपवृत्तौ गोपालानंद स्वामी
२-ब्रह्मसूत्रम् १/४/२५
३-तैत्तिरीयब्राह्मण २/८/९
४-ब्रह्मसूत्रम् १/४/२५ भाष्ये मुक्तानंद स्वामी
५-तैत्तिरीयोपनिषत् आनंदवल्ली ६/२
६-ब्रह्मसूत्रम् १/४/२६
७-ब्रह्मसूत्रम् १/४/२७
८-ब्रह्मसूत्रम् १/४/२६ प्रदीपवृत्तौ गोपालानंद स्वामी

**''योनिश्च हि गीयते**[१]''

इति सूत्रमस्य सूत्रस्य **श्रीभाष्ये श्रीमद्रामानुजाचाया अपि प्राहुः** । ''इतश्च जगतो निमित्तमुपादानं ब्रह्म च। यस्माद्योनित्वेनाभिधीयते,'''' **कर्तारमीशं पुरुषं ब्रह्मयोनिम्**[२]'' इति ''**यद्भूतयोनिं परिपश्यन्ति धीराः**[३]'' इति च । योनि शब्दश्चोपादानवचन इति ''**यथोर्णनाभि सृजते गृह्णते च**[४]''इत्यनेन सम्पूर्णेन विवेचनेनायमर्थो सिद्धयति यदस्य सकलस्य प्रपञ्चस्याभिन्ननिमित्तोपादानकारणं परंब्रह्मैव विद्यत इति[५]। अत एव तस्य विशिष्टाद्वैतत्वमपि सिद्धयति ।

## ६.९ परब्रह्मणो विशिष्टाद्वैतत्वसमर्थनम् ॥

**''सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्**[६]''

इति श्रुतौ परब्रह्मणः जगदुपादानत्त्वं निमितत्वं चोक्तम् । अस्यां श्रुतौ सच्छब्दवाच्य एव परंब्रह्मेति सर्वैर्वेदान्तिभिः स्वीक्रियते । तस्यैव सच्छब्दवाच्यस्यैवात्मत्त्वमुपदिशन्ति श्रुतिरभिधत्ते -

''**सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः**[७]'' इति । अनया श्रुत्या परब्रह्मणः जगतो मूलत्वं कारणत्वमाश्रयत्वं प्रतिष्ठात्वं चाभिहितम्। ''**स त आत्मान्तर्याम्यमृतः**[८]''इति श्रुतिः सच्छब्दवाच्यस्यैवात्मत्वमन्तर्यामित्वञ्च वक्ति ।

अस्य परब्रह्मणः सच्छब्दस्य सम्पूर्णं जगच्छरीरं वर्तते इति य-**आत्मनि तिष्ठतन्नात्मनोऽन्तरो यमयति यस्यात्मा य शरीरं य आत्मानमन्तरो यमयति**[९]'' इति श्रुतिर्वक्ति यदयं जीवात्मापि परं ब्रह्मणश्शरीरभूतं विद्यते। अनेनैव प्रकारेण ''**यः पृथिवीमन्तरे सञ्चरन् यस्य पृथिवी शरीरं यं पृथिवी न वेद**[१०]'' इत्यारभ्यः ''**योऽव्यक्तमन्तरे सञ्चरन् यस्याव्यक्तं शरीरं यमव्यक्तं न वेद**[११]''। इत्यादिभिः परश्शताभि सम्पूर्णस्य जगतः परमात्मशरीरत्वं भवति प्रतिपादितम्। लोके येन प्रकारेण देवमनुष्यादि शरीरद्धारा आत्मा भवति विशिष्टं तेनैव प्रकारेण चेतनाचेतनात्मकेन ब्रह्मविशिष्टमेवास्ते । चेतना एव चिच्छब्देनाभिधीयन्ते । अचेतनाचिच्छेब्देनाभिधीयन्ते। यस्मात् कारणात् जगदिदं चेतनाचेतनात्मकं वर्तते। तथा भूतेन जगता ब्रह्मविशिष्टं वर्तते। तस्मादेव कारणात् ब्रह्मचिदचिद्विशिष्टं वर्तते ।

इयमपरा वार्ता यत् प्रलयकाले ब्रह्मसूक्ष्मचेतनाचेतनाभ्यां विशिष्टं वर्तते । चेतनयोः सूक्ष्मत्वं नाम-नामरूपविभागानर्हावस्थावस्थितत्त्वम्। इयमेवावस्था कारणावस्थेत्यभिधीयते। सति समाप्ते प्रलयकाले च समागते सृष्टिकाले परंब्रह्म

१-ब्रह्मसूत्रम् १/४/२८
२-मुण्डकोपनिषत् ३/१/३
३-मुण्डकोपनिषत् १/१/६
४-मुण्डकोपनिषत् १/१/७
५-ब्रह्मसूत्रम् १/४/२८ श्रीभाष्यम्
६-छांदोग्योपनिषत् ६/२/१
७-छांदोग्योपनिषत् ६/८/४
८-छांदोग्योपनिषत्
९-बृहदारण्यकोपनिषत् ५/७/२५
१०-सुबालोपनिषत् ७
११-बृहदारण्यकोपनिषत् ५/६/३

सत्यसङ्कल्पं करोति ''बहुस्यां प्रजायेय'' इति । अस्य संकल्पस्य फलरूपेण गुणत्रयसाम्यावस्थावस्थितायां प्रकृतौ संक्षोभ उत्पद्यते। जायते गुणानां वैषम्यम्। तेन प्रारब्धा भवति सृष्टिः । तदनन्तरमेव जगदिदमुत्पद्यते । अस्यामेवावस्थायां ब्रह्मस्थूलचेतनाचेतनाभ्यां विशिष्टं भवति। इयमेवावस्था कारणावस्थेत्यभिधीयते।

इत्थमुभयावस्थायां ब्रह्मचिदचिद्विशिष्टमेव भवति । इत्थं चेतना चेतनविशिष्टं हि परब्रह्म अभिन्नमेव। अद्वैतत्वं नाम अभेदमेकत्वमिति यावत्। इदमेव परब्रह्मणो विशिष्टाद्वैतत्वमित्यभिधीयते। अत्रानुषङ्गिकरूपेण विशिष्टा द्वैतपदार्थोऽपि ज्ञातव्यः ।

## ६.१० विशिष्टाद्वैतपदार्थनिरूपणम् ।

उपरि परब्रह्मणः विशिष्टाद्वैतत्त्वमभिहितमिदानीं विशिष्टाद्वैतपदस्यार्थस्य निरूपणं क्रियते । श्री स्वामिनारायणवेदान्तसारकारः श्रीकृष्णवल्लभाचार्यः विशिष्टाद्वैतपदस्यार्थं निम्नांकितप्रकारेण निरूपयति । -विशिष्टस्य तस्य परब्रह्मणोऽ-द्वैतत्वमिति विग्रहः। शिष्लृ विशेषणे ततो कर्मणि निष्ठायां ''क्त'' प्रत्यये विशिष्टते स्म इति विशिष्टम्। उभ पूरणे इत्यस्मात् तौदादिकात् कर्तर्यणादिको ''इ'' प्रत्ययो, ''प्रकृतेश्च'' ''द्व'' आदेशे ''द्वि'' इति, ततो भावार्थे तल्प्रत्यये द्वयोर्भावो द्विता, ततः प्रज्ञादेराकृतिगणत्वात् स्वार्थे अणि द्वैतमिति। न द्वैतमद्वैतम्।

अथवा गत्यर्थधातूनां प्राप्त्याद्यर्थकत्वेन ''इण'' गतावित्यस्मादादादिकाद् भावे क्त प्रत्यये ईयते। प्राप्यते ज्ञायते वा ईतम्, द्वाभ्यां प्रकाराभ्यामितं द्वीतम्। द्वीतमेव द्वैतम्। न द्वैतमद्वैतम्। विशिष्टस्याद्वैतं विशिष्टाद्वैतमिति।

केषाञ्चन सिद्धान्तानभिज्ञानां मतमनुवदन् सो वक्ति न तु विशिष्टं विशिष्टं च विशिष्टे । विशिष्टं कारणावस्थावस्थितं विशिष्टं ब्रह्म । विशिष्टम्-कार्यावस्थावस्थितं विशिष्टं ब्रह्म । तयोरद्वैतं विशिष्टाद्वैतमिति समासः। वियद्वायुस्तेजःसलिलमवनिश्चेति यदिदं विकाराणां च प्रकृतिरपि यश्चेतनगणः । न चैषामेव वा यदणुतया स्यात् तनुतया प्रकारीभूतास्ते निखिलमपि यद् ब्रह्मण इदम्। ब्रह्मपदस्यात्र परब्रह्मपरत्वम् तथाविधैस्तु। तत्त्वैस्तैर्विशिष्टमखिलात्मकम्। तत्त्वमेकं परंब्रह्म श्रूयते श्रुतिमूर्धसु ''इति शिक्षापत्रीभाष्येऽप्यभिहितम्। विशिष्टस्य तत्त्वस्य सजातीयान्यशून्यता । विशिष्टाद्वैतमतन्तु विशेषणबहुत्वत इति ।

अत एव विशिष्टस्याद्वैतमेव विशिष्टाद्वैतशब्दस्य विग्रहो ज्ञेयः। वैशिष्ट्यञ्चात्र जीवेशमायाब्रह्मणामिति विवेकः। विग्रहोऽयमेवार्हः श्री स्वामिनारायणदर्शनाय।

## ६.११ परब्रह्मणः सर्वज्ञत्वादिगुणाः ।

एवं चिदचिद्विशिष्टः परब्रह्म **यः सर्वज्ञः सर्ववित् यो वेत्ति युगपत् सर्वं** इति शास्त्रवचनबलात् सदा सर्वदा सर्वज्ञ एव। मानवानां ज्ञानं शाब्दं स्मृतिरूपं वानुमानरूपं भवत्यतीतानागतवस्तुविषयकं, किन्तु भगवान् स्वयं सर्वदा सर्वं प्रत्यक्षमिव जानाति, अत एव सर्वज्ञ इत्युच्यते। तत्र निरतिशयं सर्वज्ञ बिजं इत्याह भगवान् पतञ्जलिः योगसूत्रे। सर्वज्ञत्वं नाम भूतभविष्यद् वर्तमाननां स्थूल सूक्ष्म

पदार्थनां सामान्यतो विशेषतश्च ज्ञातृत्वमिति बोध्यम्। विशेषेण परब्रह्मगुणाः पूर्वं स्वरुपनिरूपकधर्मगुणनिरूपकधर्मनिरूपणप्रसङ्गे स्पष्टीकृतमास्ते।

## ६.१२ परस्वरूपेणावस्थितिः।

परब्रह्मपञ्चधावस्थित-पर व्यूहविभवान्तर्याम्यर्चावतारभेदादिति केचिन्मन्यन्ते किन्तु **स्वामिनारायणसाम्प्रदायिकास्तु परमेश्वरः स्वामि नारायणः त्रिधाऽवास्थितः पर अन्तर्याम्यर्चाख्यभेदात्**। तत्र परो नाम- श्रीमन्मुक्तानन्दब्रह्मानन्दसच्चिदानन्दवासुदेवानन्दोत्तमराज-जयाललिताद्यनन्तभक्तैः सेवितः परमाक्षरधाम्नि दिव्यविभूतिमयसिंहासने विराजमानो दिव्यमङ्गलनवलकिशोरविग्रहो द्विभूजो दिव्यकिरीटाऽऽभूषणा- लङ्कारादिभिूषितोऽनन्तमुक्तसहकृताऽक्षरब्रह्मणाऽनवरतवन्दितसेवितचरण- कमलोऽनेकदिव्यकल्याणगुणशक्त्यैश्वर्यादिविशिष्टः श्रीस्वामिनारायणपरमात्मा विराजते, स एव परब्रह्म पुरुषोत्तमाऽक्षरातीत-पुरुषोत्तम-घनश्याममहाराज- श्रीहरि-हरिकृष्ण-सहजानन्दादिशब्दवाच्य इति, स एव निरतिशयसर्वज्ञताबीजं सर्वाविर्भावस्वामी सर्वदिव्यविभूतिस्वामी सर्वसुखमय सर्वानन्दमय स्वतःपूर्णः सर्वनियन्ता सर्वाऽऽधारः सर्वसाक्षी सर्वान्तर्यामी सर्वोपास्यमूर्ति सर्वरसमयाऽ- खण्डमूर्ति सर्वैश्वर्यशक्तिविभूतिभाजनरूपः सर्वसुन्दरतालावण्यताभाजनरूपः अपारकरुणानिधिरनवधिकाऽतिशयकल्याणगुणभाजनरूपो ब्रह्मविद्यादिभिरपि यस्य वर्णनमगोचरमिति [१]।

पररूपस्येदं वर्णनं पूर्णतया श्री स्वामिनारायण दर्शनानुकूलं वर्तते। अन्येऽप्याचार्याः स्वस्वमतानुसारेण पररूपस्य वर्णनमकार्षुः। **तत्र श्री निवासाचार्यः यतीन्द्रमतदीपिकायां पररूपस्य वर्णनं कुर्वन्तः प्राहुः**। तत्र परो नाम त्रिपाद्विभूतौ कुमुदकुमुदाक्षपुण्डरीकवामनशङ्कुकर्णसर्प(वं) नेत्र सुमुख सुप्रतिष्ठितादिभिर्दिव्यायुधभूषणपरिजनपरिच्छदान्वितैर्दिव्यनगरपालकैः परिरक्षिते श्रीमद्वैकुण्ठाख्ये पुरे चण्डप्रचण्डभद्र सुभद्रजयविजयधातृविधातृप्रभृति भिर्द्वारपाल कैरुपेते श्रीमद्दिव्यालये श्रीमहामण्डपे धर्माद्यष्टपादविरचितसिंहासने शेषपर्यङ्क चतुर्भुजदिव्यमङ्गलविग्रहविशिष्टः श्रीभूनीलादिसहितः शङ्खचक्रादिदिव्यायुधोपेतः किरीटादिदिव्याभूषणः भूषितः अनन्तगरुडविष्वक्सेनादिभिर्नित्यैस्सामगान परैरन्यैर्मुक्तैश्चानुभूयमानो ज्ञानशक्त्याद्यनन्तकल्याणगुणगणविशिष्टः परब्रह्म परवासुदेवादिशब्दवाच्यो नारायणः[२]।

पररूपस्येदं वर्णनं रामानुजसिद्धान्तानुसारेण विद्यते। येन प्रकारेण श्रीस्वामिनारायणदर्शने परब्रह्मणः सर्वोत्कृष्टं रूपं वर्तते तेनैव प्रकारेण श्रीरामानुजसम्प्रदायेऽपि परब्रह्मणः सर्वोत्कृष्टं रूपं पररूपमेवास्ते। इत्याद्यनुसारेण कालकृतपरिणामरहितेऽपरिमितानन्दमये

---

१-स्वा. वेदान्तसारः पृ. ३०    २-यतीन्द्रमतदीपिका पृ. २४७-२४८

**''निष्कामै र्निहतजन्मजराविकारैः भूयिष्ठभक्तिविभवैरवाप्यम्[1]।''**
इत्यनुसारेण नित्यमुक्तजीवैरध्युषिते वैकुण्ठाख्ये लोके।

**वैकुण्ठे तु परे लोके श्रिया सार्धं जगत्पतिः ।**
**आस्ते विष्णुरचिन्त्यात्मा भक्तैर्भागवतै : सह ॥**
**एवं वैकुण्ठनाथोऽसौ राजते परमे पदे ।**
**सेव्यमानः सदानित्यैर्मुक्तैर्भोगपरायणैः [2]॥**

इत्यादिषु वर्णनानुसारेण विद्यमानं परमात्मनः स्वरूपं पर इत्यभिधीयते। परस्यैव रूपस्य वर्णनं चक्रुः श्रीवात्स्यवरदगुरवः

**उदयद्भानुसहस्रभास्वर परव्योमास्पदं निर्मलं,**
**ज्ञानानन्दघनस्वरूपममलज्ञानादिभिश्षड्गुणैः ।**
**जुष्टं सूरिजनाधिपं धृतरथाङ्गाब्जं सभूषोज्जवलं,**
**श्रीभूसेव्यमनन्तभोगि निलयं श्रीवासुदेवं भजे [3] ॥**

इत्यनेन श्लोकेन।

## ६.१३ व्यूहरूपेणावस्थितिः

परस्य ब्रह्मणोऽस्य रूपस्य वर्णनं कुर्वता श्री कृष्णवल्लभाचार्येणाभिहितम्। व्यूहः-नित्यगोलोकस्थो निरञ्जनब्रह्मपुरुषोऽनादिश्रीकृष्णो वासुदेवसङ्कर्षण-प्रद्युम्नाऽनिरुद्धभेदेन चतुर्धाऽवस्थितः। तत्र वासुदेवे ज्ञानबलैश्वर्यवीर्यशक्तितेजांसि षड्गुणाः पुरुषोत्तमाऽपेक्षया सातिशया वर्तन्ते। सङ्कर्षणे ज्ञानं बलं चेति गुणद्वयं मुख्यम्। प्रद्युम्न ऐश्वर्यवीर्ययुक्तः। अनिरुद्धः शक्तितेजोयुक्तः। एते चत्वारो तत्तद्वेशाऽऽभूषणाऽऽयुधकार्यभेदेन प्रत्येकं त्रिधा विभिद्यन्ते, तद्यथा-केशवनारायण माधवरूपत्रयं वासुदेवाद्विभाव्यते तत्र कनकप्रभः केशवश्चक्रधरः, श्यामवर्णो नारायणस्तुःशङ्खधरः, मणिप्रभो माधवस्तु गदाधर इति। अथ गोविन्दविष्णु-मधुसूदनरूपत्रयं सङ्कर्षणाद्विभाव्यते, तत्र चन्द्रप्रभो गोविन्दस्तुः शार्ङ्गधरः, पद्मकिञ्जल्कसन्निभो विष्णुश्चतुर्हलधरः, अब्जाऽऽभो मधुसूदन तु मुशलधरः। अथ त्रिविक्रमवामनश्रीधररूपत्रयं प्रद्युम्नाद्विभाव्यते, तत्राग्निवर्णस्त्रि-विक्रमश्चतुःखड्गधरः,बालसूर्याभो वामनश्चतुर्वज्रधरः, पुण्डरीकाभः श्रीधरश्चतुष्पट्टिशधरः। अथ हृषीकेशपद्मनाभदामोदररूपत्रयमनिरुद्धाद्विभाव्यते, तत्र तडित्प्रभो हृषीकेशश्चतुर्मुद्गरधरः, सूर्याभः पद्मनाभः पञ्चायुधधरः, इन्द्रगोपनिभो दामोदरश्चतुष्पाशधरः।

---

१-वत्साङ्कमिश्रकृत वैकुण्ठस्तवः ४१ ३-वात्स्यवरदाचार्यकृत परत्वपञ्चकम् श्लोक - १
२-पराशरीयधर्मशास्त्रम् उत्तरखण्ड ६/४६

यतीन्द्रमतदीपिकाकारः श्री निवासाचार्योऽप्यनेनैव प्रकारेणैतेषां चतुर्णां व्यूहानां वर्णनं करोति । परस्य ब्रह्मणो व्यूहरूपस्य प्रयोजनं निरूपयता श्रीलोकाचार्येणाभिहितं यत् व्यूहो नाम सृष्टिस्थितिसंहारार्थं संसारिसंरक्षणार्थं उपासकानुग्रहार्थं च सङ्कर्षण-प्रद्युम्न-अनिरुद्धरूपेणावस्थानमिति। अत्र तावत् श्रीस्वामिनारायणदर्शनानुयायिन उक्तं नोररीकुर्वन्ति, ते त्रिणि स्वरूपाणि स्वीकुर्वन्ति-पररूपम्, अन्तर्यामिरूपम्, अर्चारूपञ्च ।

-आकार तत्र मुख्यगौणांशावेशपूर्णाश्च के "इति विषये नहि सम्प्रदायविदूषामिदमित्थमित्युक्तिस्वथापि पं. श्रीकृष्णवल्लभाचार्येण स्वकीये श्री स्वामिनारायणवेदान्तसार नाम्नि ग्रन्थे यथा निरूपतं तथैवात्र समासेनोल्लिख्यते।

परादिस्वरूपेणावस्थितोऽनेकमुक्त जन सेवतोऽपि परब्रह्म एव करुणयाऽवतरत्यस्मिल्लोक इति शास्त्राध्ययाज्ज्ञायते । "बहूनि मे व्यतीतानि" अवतार ह्यसंख्येया इत्यादिवचनादसकृतदवतरणं भवति भगवतस्तत्र ।

## ६.१४ मुख्या अवताराः

"**यदा यदा हि धर्मस्य**[१]" इति श्लोकं विवृण्वता श्रीमता रामानुजाचार्येण, भगवदवतारहेतुं मीमांसयता, भगवता श्रीस्वामिनारायणेन चोक्तमस्ति यत्-स्वस्मिन्नतिस्नेहयुतां भक्तानां मनोरथपरिपूर्णायैव भगवान्नवतरति ।; स्वभक्तवांछा तुष्टि एव भगवत अवतरणस्य मुख्योऽस्ति हेतुः । अत्रोऽत्र येऽवतारा भक्ताय प्रकटीभूतास्ते मुख्या इति कथनमाचार्यवर्याणामिति मे मति : ।

श्रीकृष्णवल्लभाचार्यो वदत्यस्मिन् विषये यत् मुख्यावताराः दिव्यस्वरूपेणाऽकस्माद्, प्रकटीभूतः । यथा प्रह्लादरक्षणार्थं नृसिंहावतारः भस्मासुरनाशार्थं मोहिन्यवतारः, हयग्रीवमत्स्यकूर्मादयश्चापि ।

## ६.१५ गौणावताराः

पण्डितवरेण्यः श्रीकृष्णवल्लभाचार्यानुसारेण गौणावतारः तत्कार्यकर्तृत्वेन रूपेण नियतक्लृप्तावताराः । यथा ब्रह्माण्डसृष्टृत्वेन विधिरूपोऽवतारः । वेदानां समग्र विद्याप्रकाशनकर्तृत्वेन व्यासरूपोऽवतार इत्यादयः । यत्राऽवतरणे भक्तरक्षैकहेतुत्वं नास्ति तदवतरणं गौणम् ।

## ६.१६ अंशावताराः

श्रीस्वामिनारायणवेदान्तसारे ग्रन्थे श्रीकृष्णवल्लभाचार्याः अंशावताराणां वर्णनमित्थं करोति ।

---

१-भगवद्गीता ४/७

अंशावताराः यत् किञ्चित्कलावताराः यथा यत्र चेतनविशेषे ज्ञान-कलैश्वर्यात्मक यत् किञ्चिदंशः अवतरति। यथा गोपालानंद स्वामी प्रभृतयः। यद्यद्विभूतिमत्सत्त्वं श्रीमदुर्जित मेव च। तत्तदेवावगच्छ त्वं मम तेजोऽंश सम्भवम् इति वचनानुसारेणानेकेंऽशावतारा भवन्तीति वाच्यम्। शङ्करेन्द्रमेरूभृगुनारदकपिल इत्यादयः।

## ६.१७ आवेशावताराः

आवेशावतारः यत्र तस्य परस्य ब्रह्मण आवेशो भवति। यथा लोहे वह्निर्प्रविशति तदा तस्य स्वाभाविकं स्वरूपं तिरोभाव्य स्वस्वरूपेण प्रकाशत तथा केनचित् हेतु विशेषेण यस्मिन् कस्मिन्नपि आविश्य स्वकार्यं संसाध्य तिरोभवति स आवेशावतार इति। यथा परशुराम-कपिलदेव दत्तात्रेयादयः इति प्रावोचत श्रीकृष्णवल्लभाचार्य :।

## ६.१८ पूर्णावताराः

भगवतोऽस्यावतारस्य वर्णने प्राह- श्रीकृष्णवल्लभाचार्यो यत् पूर्णावतारः षोडशकलाभिः तन्न्यूनकलाभिर्वा परिपूर्णः यथा श्रीकृष्ण-रामचन्द्र-वामन-कल्कीत्याद्यवतारा इति।

अत्रेदं ज्ञातव्यं वर्तते-परब्रह्मणो विभवरूपं स्वीकुर्वतां मते इमे अवतारा एव विभवरूपेण स्वीक्रियन्ते।

## ६.१९ श्री स्वामिनारायणस्यावतारत्वसमर्थनम्

परस्य ब्रह्मणः मुख्यगौणाद्यवतरणं व्याख्याय प्राप्तप्रसङ्गेन मया श्री स्वामिनारायणरूपेणावतरणं प्रमाणीक्रियते व्यासवचनैः। अधोनिर्दिष्टानां श्लोकानामनुशीलनेन सार्कं भगवतः श्री स्वामिनारायणस्य जीवनवृत्तानुशीलनाज्ज्ञायते व्यासमुनिना पूर्वे यदुक्तं तदैव तथ्यसत्यमस्ति भगवति श्री स्वामिनारायणे। तानि च सन्ति वचनानि -भगवान् श्री स्वामिनारायण अवतारी पुरुष आसीदित्यर्थे तेषु तेषु पुराणेषु अनेके श्लोकाः समुपलभ्यन्ते-तथाहि

स्कन्दपुराणे वैष्णवखण्डे वेंकटाद्रिमाहात्म्यस्य अध्याये ७, श्लोको ९,श्लोको वर्तते,

**'स्वामी नारायणोऽस्माकमास्ते श्रीवेंकटाचले।**
**कदाचित् हयमारुह्य हंसशुक्लं मनोजवम्**' [१] ॥

इति हयारोहण कर्तारं श्री स्वामिनारायणं स्पष्टतया अवतारित्वेन वक्ति।

---

१-स्कन्दपुराणम् वैष्णवखण्ड ७/९

नारदपञ्चरात्रे भारद्वाजसंहितायां परिशिष्टे द्वितीयाध्याये श्लोके ४०,

**न्यासाख्यं परमं मन्त्रं वाचयित्वाऽथ बोधयेत ।**
**श्रीमन्नारायणः स्वामी दासस्त्वमसि तस्य वै ॥**

अस्मिन् श्लोके महर्षि भारद्वाजो वक्ति यत् सर्वे आचार्या स्वकीयाः शिष्याः समुपदेष्टव्या यत् त्वं भगवतः श्री स्वामिनारायणस्य दासोऽसीति त्वया भावनीयम् ।

ब्रह्मवैवर्तपुराणे श्रीकृष्णजन्मखण्डे अध्याये ७८, श्लोकः ४०,

**श्रुणु नारायणक्षेत्रं जलाद्वस्तुचुतुष्टयम् ।**
**अत्र नारायणः स्वामी नान्यः स्वामी कदाचन ॥**

षट्चक्रनिरुपणे पादुकापञ्चकग्रन्थटीकायां पुरश्चरणरसोल्लासे – श्रीमहादेव उवाच

**श्रुणु प्रिये प्रवक्ष्यामि यदेतत्पृष्ठमुत्तमम्**
**–सहस्त्रारं महापद्मं –सहस्त्रदलसंयुतम् ॥**
**सदा ब्रह्मपुरं तत्तु नित्यानंदमयं सदा ।**
**नानागन्धयुतं पद्मं सहजानंदमन्दिरम् ॥**

प्रबोधचन्द्रोदये षष्ठांके श्लोकः १४, उपनिषदुवाच,

**यस्माद्विश्वमुदेति यत्र रमते यस्मिन् पुनर्लीयते ।**
**भासा यस्य जगद्विभाति सहजानन्दोज्जवलं यन्महः ॥**
**शान्तं शाश्वतमक्रियं यमपुनर्भावाय भूतेश्वरम् ।**
**द्वैतध्वान्तमपास्य यान्ति कृतिनः प्रस्तौमि तं पुरुषम् ॥**

बृहन्नारदीयपुराणे पूर्वखण्डे अध्याये ७०,श्लोक– ३

**तारहृत्पूर्वकं ङेऽन्तं नारायणपदं भवेत् ।**
**अष्टाक्षरो मनुश्चाऽस्य साध्यो नारायणो मुनिः ॥**

पद्मपुराणे उत्तरखण्डे अध्याये ७२, विष्णुसहस्त्रनामसु,–

**नरः कृष्णो हरिर्धर्मनन्दो धर्मजीवकः ॥**

श्रीमद्भागवते एकादशस्कन्धे अध्याये ४, श्लोकः ३८,–

**कृतादिषु प्रजा राजन् कलाविच्छन्ति संभवम् ।**
**कलौ खलु भविष्यन्ति नारायणपरायणाः ॥**

वाराहपुराणे अध्याये १०, वाराह उवाच हे पृथिवि ?,

**स च नारायणो देवः कृते युगवरे प्रभुः ॥**
**–त्रेतायां रुद्ररूपस्तु द्वापरे यज्ञमूर्तिमान् ।**
**कलौ नारायणो देवो ब्रह्मरूपो व्यजायत ॥**

कूर्मपुराणे अध्याये २७, श्रीकृष्ण उवाच हे महर्षयः ! –

**ये ब्राह्मणा वंशजाता युष्माकं वै सहस्त्रशः ।**
**तेषां नारायणे भक्तिर्भविष्यति कलौ युगे ॥**
**परात्परतरं यान्ति नारायणपरा जनाः ॥**

श्रीमद्भागवते द्वितीयस्कन्धे अध्याये ४, श्लोकः १८,-

**किरातहूणाऽऽन्ध्रपुलिन्दपुल्कसा आभीरकंका यवनाः खसादयः ।**
**येऽन्ये च पापा यदुपाश्रयाश्रयाः शुद्ध्यन्ति तस्मै प्रभविष्णवे नमः ॥**

श्रीमद्भागवते दशमस्कन्धे उत्तरार्धे अध्याये ५०, श्लोकः १०,

**-अन्योऽपि धर्मरक्षायै देहः संभ्रियते मया ।**
**विरामायाप्यधर्मस्य काले प्रभवतः क्वचित् ॥**

श्रीभगवद्गीतायाम्

**-यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।**
**अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ॥**

शिवपुराणे रुद्रसंहितायां २, सतीखण्डे २, अध्यायः ४३-

**नाऽनीतिकारकः स्वामी परब्रह्म सतां गतिः ॥**

श्रीमद्भागवते दशमोत्तरार्ध अध्याये ४०, श्लोकः १०, भक्तरञ्जन्याम्

**-धर्मदेवात्तदा मूर्तौ नरनारायणात्मना ।**
**प्रवृत्तेऽपि कलौ ब्रह्मन् भूत्वाऽहं सामगो द्विजः ॥**
**मुनिशापान्नृतां प्राप्तं सर्षि जनकमात्मनः ।**
**ततोऽविता गुरुभ्योऽहं सद्धर्म स्थापयन्नजः ॥**

ब्रह्मवैवर्तपुराणे खण्डे ४,पूर्वार्धे, अध्याये २२, धेनुक उवाच

**अंशेन ज्ञानिनां श्रेष्ठो नरनारायणावृषी ।**
**त्वं च धर्मसुतो भूत्वालोकनिस्तारकारकः ॥**

स्कन्दपुराणे काशीखण्डे ४ उ, स०अ० ६१, पृष्ठ २६२, -

**नारायणाः शतं पञ्चाशतं च जलशायिनः ।**
**त्रिंशत् कमठरूपाणि, मत्स्यरूपाणि विंशतिः, ॥**
**गोपालाश्च शतं साऽष्टं, बुद्धाः सन्ति सहस्त्रशः, ।**
**त्रिंशत् परशुरामाश्च मुक्तिमण्डलमध्यगः ॥**

शिवपुराणे उमासंहितायाम् अध्याये ४०, -रामो दशरथाज्जज्ञे

**विष्ण्वंशः सूर्यवंशजः ॥**

पद्मपुराणे उत्तरखण्डे अध्याये २५७, -

**मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः ॥**
**रामो रामश्च कृष्णश्च बुद्धः कल्किश्च ते दश ॥**

सुधासिन्धौ मध्यस्य तरंगे १३, श्लोके: ६३, –

**रामकृष्णादयः सर्वेऽवताराः सन्त्यतो हि मे ।**
**पुरुषोत्तमस्य वित्तेत्येतत् सत्यं ब्रवीमि वः ॥**

एभिः प्रमाणवचनैः भगवतः श्री स्वामिनारायणस्यावतारित्वं भवति प्रतिपादित मिति मे मतिः ।

## ६.२० श्रीस्वामिनारायणस्यावतार विषयकाः मताः ।

सर्वावतारी भगवान् श्रीस्वामिनारायण आसमुद्रान्तसत्कीर्ति । विश्ववियन्मण्डले सम्प्रति तद्यशोऽनुगानं प्रतिपलमक्षुण्णं कर्णविवरं पावयति । तदैश्वर्याप्तसत्पुरुषैरनुदिनेमेधते श्रीः । सम्प्रति प्राप्तसत्समागमाः सज्जनाः भगवान् श्री स्वामिनारायणः सर्वोपरि, समेषां भगवदवताराणां अवतारीति वदन्ति । शास्त्रेषु यथा गीयते भगवतो यशोऽनुगानं तद्वदस्य भगवतो यशोऽनुगानं कुर्वन्ति समे जनाः । तथा च श्रुतिराह–

**यस्य देवे पराभक्ति यथा देवे तथा गुरौ ।**
**तस्यैते कथिता ह्यर्था प्रकाशन्ते महात्मनः**[१] । इति ।

इति श्रुतिरेवाचार्ये देवत्व बुद्धिरूपदिशति । अथापि केषाञ्चनामत्र जायते विप्रतिपत्तिः । वस्तुतस्तु साम्प्रदायिकग्रन्थानां, तदितिहासवाक्यानां च श्रवणेन विषयेऽस्मिन् मतमतान्तरलाभो भवति । अत्र सम्प्रदायविषये आपाततोऽयं वादः श्रीकृष्णोपासकः श्रीस्वामिनारायण सम्प्रदायः । श्रीमदुद्धववावतारेण श्री रामनंदस्वामिना स्थापितोऽयं सम्प्रदायः । श्री स्वामिनारायणस्यैव परब्रह्मत्वेनोपासनां कुर्वन्ति । किन्त्वत्र नहि समेषां संमतिः यत् श्रीकृष्ण एव श्री स्वामिनारायण इति । केचिन्नरनारायण एव स्वामिनारायण इति । केचित्तु बुद्धावतार एव श्री स्वामिनारायण इति । केचित्तु श्रीकृष्ण एव श्री स्वामिनारायण इति । तथा तथा प्रतिपद्यन्ते । वस्तुतस्तु उपासनाविषयकं परब्रह्मतत्त्वं

**"तर्काप्रतिष्ठानात्**[२]**"**

नहि तत्र तर्कावलम्बनमपितु उपासनामात्रविषयभूतमिति मे मनीषा । तथाप्यत्र दर्शनसम्प्राप्यमाणानां श्री स्वामिनारायणस्यावतार विषयकमतानां समालोचना क्रियते ।

(१) श्री आधारानंदमुनिमुख्यकृतं शताब्दिद्वयपूर्वप्रचलितं श्रीहरिप्रतिमायां अधस्ताद् "**श्रीबुद्धावतारस्वरूपमिदम्** " इति उल्लेखितं पठ्यते ।

---

१–श्वेताश्वतरोपनिषत् ६/२३

२–ब्रह्मसूत्रम् २/१/११

प्राप्यते च प्रासादिकानि तानि श्री स्वामिनारायण भगवत्समकालिकानि स्वरुपाण्यद्यत्वेऽपि । अथ च भगवता श्री स्वामिनारायणेन "अहिंसा परमो धर्म" इति महता रवेण उद्घोषितम् । शिक्षापत्र्यामपि

**कस्यापि प्राणिनो हिंसा नैव कार्यात्र मामकैः ।**
**सूक्ष्मयूकामत्कुणादेरपि बुद्ध्या कदाचन ॥**
**देवतापितृयागार्थमप्यजादेश्च हिंसनम् ।**
**न कर्तव्यमहिंसैव धर्मः प्रोक्तोऽस्ति यन्महान् ॥**
**स्त्रिया धनस्य वा प्राप्त्यै साम्राज्यस्य च वा क्वचित् ।**
**मनुष्यस्य तु कस्यापि हिंसा कार्या न सर्वथा** [1] ॥

इत्यादिना बुद्धवदहिंसायाः प्रतिपादनं सर्वत्र मुक्तकण्ठतः कृतम् । हिंसाप्रधानयागादीनामपि खण्डनं कृत्वाहिंसायज्ञप्रस्तोताऽभवत् । अतः तत्कालीने समये श्री स्वामिनारायणः 'बृद्धस्यावतार' इति ख्यातिं लेभे । न केवलं जनसामान्योऽपितु तदुपासकपरमहंसानां कृतावपि' "**बृद्धस्वामिने नमोनमः**" । इति । मंगललेखः प्राप्यते हस्तलिखितेषु पुस्तकेषु च ।

(२) श्री स्वामिनारायणीयेषु समेषु चरित्रग्रन्थेषु तदवतरणवृत्ताऽनुसारं श्री नरनारायण एवावतीर्णः श्री स्वामिनारायणरूपेणेति ज्ञायते । बदर्या - श्रमाश्रानां ऋषीणां मध्यस्थः श्रीनारायणः यदोपदेशधारामवाह्यत्तदागत्य सुलभकोपेन दुर्वाससा मुनिना शप्तः श्रीनरनारायणः श्री स्वामिनारायण रूपेणावतीर्णः धरायामिति । श्रीमत्सत्सङ्गिजीवनम्, श्रीहरिदिग्वजयः, श्रीसत्संगिभूषणः, श्रीभक्तचिंतामणिः इत्यादिग्रन्थानामालोके प्रायः उपर्युक्तकथनस्यैव पुष्टिर्भवति । अधुनापि उत्तरपीठस्थानां कृतेऽयं वादः प्रमुखः ।

(३) **सः श्रीकृष्ण परंब्रह्म भगवान् पुरुषोत्तमः ।**
**उपास्य इष्टदेवो नः सर्वाविर्भावकारणम्** [2]॥

इति श्लोकेन यद्यपि श्रीकृष्णस्येष्टदेवत्वं उपदिष्टं श्रीभगवता तथापि तत्तु नूनाट्याचरणमेव । स्वयमेवासीत्स श्रीकृष्ण इति प्रथा प्रबला आधुनिकानां समेषां मनसि वादोऽयं प्राधान्यं भजते । सर्वत्रलब्ध प्रचारोऽयं वाद श्री स्वामिनारायणदर्शनस्य प्रमुखेषु ग्रन्थेष्वपि स्थानमलभत । अत एव

१-शिक्षापत्री श्लोक - ११-१३
२-शिक्षापत्री श्लोक - १०८

भगवतः श्रीस्वामिनारायणस्य श्रीकृष्णावतारत्वमेव स्वीकर्तव्यमिति प्रायः प्रमुखानां दर्शनग्रन्थानां रव इति । श्रीकृष्ण स एव श्रीराधादिभिः सेवितः । अस्मिन् प्रसंङ्गे तेषां तेषां मतानां पर्यालोचनं कृत्वा मया त्वस्यैवार्थस्य समर्थनं क्रियते यद् भगवान् स्वामिनारायणः कस्याप्यवतार नासीत् न वा वर्तते । अपितु सः स्वयमेव समेषामवताराणामवतारी विद्यते । तस्यैव भगवतः स्वामिनारायणस्य परब्रह्मणः ते ते अवतारा अस्यां धरण्यां सम्भवन्ति । अत एव सर्वेषामवताराणां भगवानयं मूलम् । अन्ये चावताराः मूलिनः । इति ।

## ६.२१ श्री स्वामिनारायणस्य सर्वावतारित्वसमर्थनम्

यथा सर्वेषां नक्षत्राणा तेजांसि राकेशे, राकेशस्य च भास्करेऽन्तर्भवति तथैव यस्मिन्नवतारस्वरूपे प्राक्तनानामवताराणां समेषां तेजांसि विलीयेषुः स एवावतारः परिपूर्णावतारः समेषां भगवदवताराणामवतारि एव इति हि शास्त्राणामस्त्यनुशासनम् । तद्यथा-

**यस्मिन् सर्वाणि तेजांसि विलीयन्ते स्वतेजसि ।**
**तं वदन्ति परे साक्षात् परिपूर्णतमः स्वयम्** [१]॥

श्रूयते लोके, गीयते च शास्त्रेषु नैकवारं भगवति परस्मिन् श्रीस्वामिनारायणे प्राक्तनानां सर्वेषामवताराणामन्तर्भावः । तथाहि

**हरेस्तेजसि लीनं ते श्रीकृष्णं ददृशुस्ततः ।**
**सूर्यतेजसि तारावत्ततस्तं च पृथक् पृथक्** [२] ॥

सत्संङ्गिजीवनेऽपि शतानंदमुनिनैश्वर्यलीलालेखनावसर आश्चर्यसमाधि-लीलानिरूपणनामाऽध्याये लिखतमस्ति यत् श्रीवल्लभकुलाश्रिताः, निम्बादित्य-सम्प्रदायस्थाः माध्वीयसम्प्रदायस्थाः, श्रीरामानुजाश्रिताः शाङ्कराः सौराः, शाक्ताः गाणपत्याः त्रैवर्णिकाः सहस्रशः समाधौ स्वस्वेष्टदेवं ददृशुः नीलकण्ठम् । पूर्णमनोरथाश्च सन्ति समे समाधित उत्थिताः सन्त अभुवन्

**ते चातिविस्मिताः स्वे स्वे हृदि दृष्टं परस्परम् ।**
**वदन्तो नीलकण्ठं स्म सर्वरूपधरं विदुः** [३]॥

नीलकण्ठं - श्री स्वामिनारायणं (तस्यापरनामास्ति )

सर्वरूपधरं - सर्वावतारधारणहेतुं - विदुः - विदाञ्चक्रुः

सर्वावतारहेतुत्वेन श्रीहरिं ज्ञात्वा हित्वा स्वमतं तदाश्रयं जग्मुः । तस्यावतारित्वमेव प्रकटीचकारलीलया स्वयं भगवानिति सिद्धांतः । नूनमयं

---

१-गर्गसंहिता गो.सं-१/२४
२-हरिकल्पतरु स्कन्ध -३. अ.७ श्लोक- १२

भगवान् स्वयमक्षरपर इति श्रीमुक्तानंदमुनिः गोपालानंदमुनिः शतानंदमुनिः श्रीरघुवीराचार्यश्च उद्घोषितवन्तः स्वकीयेषु ग्रन्थेषु ।

स्वयमपि भगवता श्रीहरिवाक्यसुधासिन्धावुक्तमस्ति –

**रामकृष्णादय : सर्वेऽवताराः सन्त्यतो हि मे ।**
**पुरुषोत्तमस्य वित्तेत्येतत् सत्यं ब्रविमि वः [1]॥**

अत्र श्रीरघुवीराचार्या –रामेति । अतो हेतोः । रामकृष्णादयः । सर्वे अवताराः । पुरुषोत्तमस्य । मे मम । सन्ति । हि । इतीत्थं । वित्त यूय जानीत । अहं । वो युष्मभ्यम् । एतत् । सत्यं यथार्थमेव । ब्रवीमि ॥ इति स्वयमेव भगवता श्रीस्वामिनारायणेनोक्तमस्ति ।

श्रीहरिलीलाकल्पतरु ग्रन्थे वायुपुत्रस्योक्तिवर्तते भक्तिं प्रति–

**युष्मत्पुत्रात् बिभेत्यस्मात्सर्वलोकभयङ्करः ।**
**कालस्तथेश्वर : सर्वे सन्त्यस्यादेशवर्तिनः ॥**
**हेतुरेवावताराणामवतारी स्वराट् प्रभुः ।**
**एषाऽक्षराक्षरपरः कारणानां च कारणम् [2]॥**

सत्सङ्गिजीवनेऽप्युक्तं सिद्धमुक्तशतानंदेन स्वामिना ।

**देवानामपि यो देव ईश्वराणां तथेश्वरः ।**
**कालस्यापि हि यः कालः कारणानां च कारणम् ॥**
**संस्तूयते यो निगमैः सहस्रवदनादिभिः ।**
**वाङ्मनोऽगोचरो यश्च परमात्मा परात्पर : ॥**
**स एव साक्षाद् भगवान् स्वामिनारायणाख्यया ।**

स्वेष्टदेवस्य सर्वावतारित्वं समर्थितवान् त्रिकालज्ञः, शतानंदमुनिः । श्रीमत् सत्संगिभूषणेऽप्युक्तमास्ते ।

**हरिकृष्णावतारोऽयं सर्वेभ्योऽप्यधिकस्तव ।**
**तेभ्योऽपि तत्समो नैव तस्य तत्कारणत्वतः ॥**

श्रीहरिलीलाकल्पतरु ग्रन्थे श्री रघुवीराचार्योऽपि वक्ति

**तस्माद् यदा त्वं नु मयि प्रसन्नो मद्याचितं देहि तदा वरं मे ।**
**यथा परत्वं पुरुषोत्तमत्वं तवाऽवतारित्वमनन्यतुल्यम् [3]॥**

अयमाशयः स्वावतारकार्येण भगवान् श्री स्वामिनारायणः पुरुषोत्तम परब्रह्म इत्युपासनार्हः । श्रीगोपालानंदमुनिना "**पुरुषोत्तमनिरूपण**" नाम्नि

---

१-हरिवाक्यसुधासिन्धुः- १४६/६३
२-हरिकल्पतरु स्कन्ध -२. अ.१ /५२
३-हरिलीलाकल्पतरु - १/१३/९

ग्रन्थेऽस्यैव निरूपणं कृतं वर्तते । भगवान् यादृशीभिर्भावनाभिरूपास्यते तादृशीप्राप्तिर्भवतीति राद्धान्तः सर्वसम्मतः ।

**यं यं वापि स्मरन् भावं त्यजन्त्यन्ते कलेवरम् ।**
**तं तमेवैति कौन्तेय सदा तद्भावभावितः ॥**
**देवान् देवयजो यान्ति यान्ति मद्याजिनोऽपि माम्[१]॥**

साधकोऽपि सर्वतो परभावेन परब्रह्म उपास्ति स कालेन भक्त्या प्रपत्त्या प्रसाद्य परात्परं परंब्रह्म तत् प्राप्नोति । अनेन वर्णनेनायमर्थः सिद्धो यद् भगवान् स्वामिनारायण एव सर्वेषामवताराणामवतारीति ।

## ६.२२ श्री स्वामिनारायणावतारविषयकमतशोधनम् ।

भगवान् श्री स्वामिनारायणोऽवतारस्याद् वावतारि किमनेन गौरवास्पदवर्णनेनेति न साधुवचः । शास्त्रेष्वनेकेषु स्थलेष्ववतारावतारिणोरैक्येन प्रतिपादनं दृश्यते । श्रूयते च पुनर्लोके - एकेश्वर इति । ईश्वरस्यानेकत्वे सृष्टिविघातोऽपि सम्भवति । एकस्तावत् वृष्टिर्कर्तुमिच्छत्यन्यस्तु तदभाव संघटनविघटनदोषो दुर्निवार्यो भवति ।

तस्यैकत्वेऽपि लोकसिद्धभेदस्तु दृश्यते एव । यदुपदिश्यत एकत्वं तत्तु तत्तदवताराणामवतारी पुरुषोत्तमस्यैव विज्ञेयम् । यच्च विघटनं दृश्यते तत्तु -

**मत्स्यं कूर्मं वराहं कपिलमथ हरिं वासुदेवं च वैन्यं**
**दत्तात्रेयं च हंसं नरहरिमृषभं वामनं परशुरामम् ।**
**यज्ञं रामं कुमारं हयशिरसमथो नारदं राजराजम्,**
**व्यासं कृष्णं च बुद्धं धृतपुरुषवपुषं नौमि नारायणं त्वाम्[२] ॥**

**निः श्रेयसाय जीवानां श्री विष्णुभगवान् स्वयम् ।**
**आविर्भवति भूलोके स्वतंत्र : करुणानिधिः ॥**
**नरनारायणो दत्त ऋषभ कपिलादय : ।**
**रामकृष्णादयश्चास्यावताराः सन्ति भूरिशः[३]॥**

इत्याद्यनेकशास्त्रवचनेषु समेषामाविर्भावानामैक्यमुद्घोष्यते । वस्तुतस्तु तत्र तत्रावताराः श्रीपरब्रह्मणोऽनुप्रवेशानन्तरं श्री विष्णोः वैराजपुरुषस्येव भवन्ति । बहुधा शास्त्रेषु पुरुषः -वैराजः पुरुषोत्तम इत्यादिरूपेण प्रतिपाद्यते तस्यानुप्रवेशात्तस्यैवावतारा इत्यैक्यवचसामभिप्रायः पूर्वप्रतिपादितावतारीत्व-प्रकरणोक्तरीत्या श्रीकृष्णस्यैवावतारित्वं प्रतीयते स्म श्रीस्वामिनारायणात्प्राक् -

---

१-भगवद्गीता ८/६
२-सत्सङ्गिजीवनम् ३/१७/१२
३-सत्सङ्गिजीवनम् ३/२४/१०-११

अ.६

तदुक्तं भगवता श्री स्वामिनारायणेन –

**अवतारा भगवतो भवन्त्येव सहस्रशः ।**
**तत्र कृष्णसमो नाऽन्योऽवतारः सर्वशक्तिधृत् ।**
**अन्येषां स्वरूपाणां भावा ये तेऽखिला अपि ।**
**अत्र संदर्शितास्तेन कृष्णः स्वयमितीर्यते ॥**
**स्वजन्मकाले मथुरापुर्यां लक्ष्मीशताऽत्मनः ।**
**चतुर्भुजेन रूपेण पितृभ्यां तेन दर्शिता ॥**
**गौकुले च यशोदायै विश्वरूपत्वमात्मनः।**
**प्रदर्शितं चार्जुनाय वैराजत्वं महामृधे ॥**
**अर्जुनायैव दत्तं च भूमरूपस्य दर्शनम् ।**
**पुरुषोत्तमता चोक्ता स्वमुखेनैव तं प्रति ॥**
**यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः।**
**अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥**
**राधादिसहितत्वेन गोलोकेश्वरता तथा ।**
**यमुनां प्रति गोप्युक्ता दर्शिताऽऽद्यर्षितात्मनः ।**
**अक्रूराय च कालिन्द्यां दर्शिता शेषशायिता ।**
**नैकाण्डदर्शनेनैव ब्रह्मणेऽक्षरता तथा ॥**
**एवं स्वस्य स्वरूपाणि भिन्नस्थानगतान्यपि ।**
**तदैश्वर्याणि च स्वस्मिन् शक्तयश्च प्रदर्शिताः ॥**
**अतः सर्वावतारेभ्यः कृष्ण एव महानिति [1]।**

अयमाशयः श्रीकृष्णस्य सर्वातिशायि माहात्म्यं तदैश्वर्य प्रतापादेव वर्तते तथैव भगवतः श्री स्वामिनारायणस्य प्रतापातिशयात् ततोऽप्युपरित्वमक्षुण्णमेव मन्यन्ते स्म समे मानवाः ।

## ६.२३ उपसंहारः

**नेति नेति** इति वेदैर्यस्य महिम्नः गानं क्रियते, तस्य वाङ्मनसामगोचरस्य परब्रह्मणः लक्ष्माणि कथितानि। आध्यात्मिकशास्त्राणां परिशिलनाद् वक्तुं शक्यते यद् जगत् सर्वं देवाधिनमस्ति । तस्यैवाभिधानाज्जीवः नानायोनिषु भ्रमति । भ्रमणमिदं संसारशब्देनाभिधियते। **मामेव ये प्रपद्यन्ते माया मेतां तरन्ति ते** इति वचनानुसारेण भक्तिप्रपतिभ्यां प्रसन्नः भगवान् परब्रह्म एव जीवानां गोप्ता भवति। सोऽयं परमात्मैव सर्वेषां कर्माणां फलप्रदाता सर्वेषां कार्याणामुत्पादकः, सर्वजगच्छरीरकः, सर्वव्यापकः, सर्वज्ञः, सत्यसंकल्पः, स्वेतरेभ्यो समस्तेभ्यो

वस्तुभ्यो बृहत्, तेषां बृंहणकर्ता च विद्यते। अयमेव भगवान् मुक्तानां परमा गतिः पुरुषोत्तमः, जगतोऽस्य सकलस्य सृष्टिस्थितिलयानां कारणः, अखिलहेयप्रत्यनीकः वर्तते।

प्रबन्धेऽस्मिन् "**शुद्धे महाविभुत्याख्ये .......सर्वकारणकारणे**" । "**सम्भर्तेति तथा भर्ता...... वीर्यतेजांस्यशेषत** इत्यादिना भगवतः गुणानां वर्णनं कृतमस्ति। "**यतो वा ......तद् ब्रह्म** " इत्यादिना परब्रह्मणस्वरूप निरूपणम् कृत्वा "**सन्मूलाः ..... सत्यप्रतिष्ठाः** ' इत्यादि श्रुत्या जगत अभिन्न निमित्तोपादानकारणता प्रतिपादिता। सर्वेषामेव तत्त्वानां यस्मात् कारणात् परब्रह्मणः सत्तायुक्तैव सत्ता भवति, तस्मादेव कारणात् तस्य सत्यत्वेनाभिधानं करोति श्रुतिः।

यत्तु ज्ञानस्वरूपं ब्रह्माह श्रुतिस्तस्यायमभिप्रायो वर्तते यत् – परंब्रह्मैव स्वाभाविकरूपेण सर्वज्ञः, तद्व्यतिरिक्तमुक्तादिनां यत्सर्वज्ञत्वादिकं गुणं भवति तत् परमात्मनः कृपयैव। श्रुतिरप्याह – "**यः सर्वज्ञः सर्ववित्** "। "**परास्य शक्तिर्विविधैव.....ज्ञानबलक्रिया च**"।

अन्वयव्यतिरेकस्वरूपनिरूपणं, साकारदिव्यविग्रहनिरूपणं, विशिष्टाद्वैततत्त्वसमर्थनम्, परव्यूहादिस्वरूपनिरुपणं, अवताराणां तेषां भेदानां च निरूपणं कृत्वा भगवतः श्री स्वामिनारायणस्यावतारविषयकं मतं स्पष्टिकृतमास्ते प्रकरणेऽस्मिन्।

वस्तुत ईन्द्रियान्तःकरणानामगोचरः परब्रह्म। न स वाग्विषयो भवति, न च वादविवादविषयः। तीव्रेण भक्तियोगेन भजमानानां योगीनां वा प्रत्यक्षो भवति। अतः बुद्धिबलं तर्कप्राबल्यं वा विहाय परब्रह्म सर्वतो भावेन भजनीय एवेति दर्शनस्यास्य सिद्धान्तः।